(38^{ab}) अन्येषु प्रेष्यमाणेषु पुरस्ताद्धीर उत्पतेत् ।
(38^{cd}) करिष्याम्यहमित्येव यः स राजसु सिध्यति ।
(39^{ab}) उष्णे वा यदि वा शीते रात्रौ वा यदि वा दिवा ।
(39^{cd}) आदिष्टो न विकल्पेत यः स राजसु सिध्यति ।
नैवं प्राप्तोऽवमन्येत सदा मर्त्यो विशारदः ।
(37^{cd}) ऋजुर्मृदुः सत्यवादी यः स राजसु सिध्यति ।
(31^{ab}) नैव लाभाद्धर्षमियान्न व्यथेच्च विमानितः ।
(31^{cd}) समः पूर्णतुलेव स्याद्यो राजवसतिं वसेत् ।
(37^{ab}) अल्पेच्छो मतिमाञ्श्रीमाञ्छायेवानपगः सदा ।
दक्षः प्रदक्षिणो धीरः स राजवसतिं वसेत् ।
इतिहासपुराणज्ञः कुशलः सत्कथासु च ।
वदान्यः सत्यवाक्चापि स राजवसतिं वसेत् ।
(24^{ab}) न मिथो भाषितं राज्ञो मनुष्येषु प्रकाशयेत् ।
(24^{cd}) यं चासूयन्ति राजानः पुरुषं न वदेच्च तम् ।
(42^{ab}) नैषां कर्मसु संयुक्तो धनं किंचिदपि स्पृशेत् ।
(42^{cd}) प्राप्नुयादाददानो हि बन्धं वा वधमेव वा ।
तुल्योपस्थितयोः पश्यन्मम चान्यस्य चोभयोः ।
अन्यं पुष्णाति मद्धीनमिति धीरो न मुह्यति ।
श्रेयांसं हि परित्यज्य वैद्यं कर्मणि कर्मणि ।
पापीयांसं प्रकुर्वीरञ्शीलमेषां तथाविधम् ।
(14^{ab}) नैषां दारेषु कुर्वीत प्राज्ञो मैत्रीं कथंचन ।
रक्षिणश्च न सेवेत यो राजवसतिं वसेत् ।
यदा ह्यभिसमीक्षेत प्रेष्यस्त्रीभिः समागतम् ।
बुद्धिं परिभवेत्तस्य राजा शङ्केत वा पुनः ।
शङ्कितस्य पुनः स्त्रीषु कस्य भृत्यस्य भूमिपः ।
जीवितं साधु मन्येत प्रकृतिस्थो बलात्कृतः ।
(29^{ab}) हर्षवस्तुषु चाप्यत्र वर्तमानेषु केषुचित् ।
(29^{cd}) नातिगाढं प्रहृष्टः स्यात्तान्येवास्यानुपूजयेत् ।
हर्षाद्धि मन्दः पुरुषः स्वैरं कुर्वीत वैकृतम् ।
तदस्यान्तःपुरे वृत्तमीक्षां कुर्वीत भूमिपः ।
अन्तःपुरगतं ह्येनं स्त्रियः क्लीबाश्च सर्वशः ।
वर्तमानं यथावच्च कुत्सयेयुरसंशयम् ।
तस्माद्गम्भीरमात्मानं कृत्वा हर्षं नियम्य च ।
नित्यमन्तःपुरे राज्ञो न वृत्तिं कीर्तयेद्बहिः ।
यथा हि सुमहान्मन्त्रो भिद्यमानो हरेत्सुखम् ।
एवमन्तःपुरे वृत्तं श्रूयमाणं बहिर्भवेत् ।
या तु वृत्तिरबाह्यानां बाह्यानामपि केवलम् ।
उभयेषां समस्तानां शृणु राजोपजीविनाम् ।
न स्त्रियो जातु मन्येत बाह्यो वाभ्यन्तरोऽपि वा ।
अनुजीविनां नरेन्द्रस्तु सृजेद्धि सुमहद्भयम् ।
मत्वास्य प्रियमात्मानं राजरत्नानि राजवत् ।
अराजा राजयोग्यानि नोपयुञ्जीत पण्डितः ।
अराजानं हि रत्नानि राजकान्तानि राजवत् ।
भुञ्जानं न नरं राजा तितिक्षेतानुजीविनम् ।
तस्मादव्यक्तभोगेन भोक्तव्यं भूतिमिच्छता ।
तुल्यभोगं हि राजा तु भृत्यं कोपेन योजयेत् ।
न चापलेन संप्रीतिं राज्ञः कुर्वीत केनचित् ।
अधिक्षिप्तमनर्थं च द्वेष्यं च परिवर्जयेत् ।
एतां हि सेवमानस्य नरसीमां चतुर्विधाम् ।
द्विधा विच्छिद्यते मूलं राजमूलोपजीविनः ।
एतैस्तु विपरीताया नरसीमा नराधमैः ।
तया कुर्वीत संसर्गं न विरोधं कथंचन ।
बन्धुभिश्च नरेन्द्रस्य बलवद्भिश्च मानवैः ।
साधु मन्येत संसर्गं न विरोधं कथंचन ।
ताभ्यां तु नरसीमाभ्यां विरुद्धस्याल्पतेजसः ।

प्रथमं छिद्यते निद्रा द्वितीयं जायते भयम् ।
उद्धतानां च यो वेषः कुहकानां च यो भवेत् ।
राजवेषं च विस्पष्टं तान्सर्वान्परिवर्जयेत् ।
इतराभ्यां तु वेषाभ्यां परिहास्येत बान्धवैः ।
अपुंभिश्चैव पुंभिश्च स्त्रीभिः स्त्रीदर्शिभिर्नरैः ।
शक्ये सति न संभाषां जातु कुर्वीत कर्हिचित् ।
प्रतिसंभाषमाणो हि त्रिभिरेतैरचेतनः ।
श्येनः पेशीमिवादत्ते पुरुषो भूतिमात्मनः ।
ये च राज्ञा च सत्कारं लभेरन्कारणादिव ।
तैश्च सामन्तदूतैश्च पूज्यमानो मुनिर्भवेत् ।
न चाप्यचरितां भूमिमसंदिष्टो महीपतेः ।
उपसेवेत मेधावी यो राजवसतिं वसेत् ।
(23ab) न च संदर्शने राज्ञः प्रबन्धमपि संजपेत् ।
(23cd) अपि चैतद्दरिद्राणां व्यलीकस्थानमुत्तमम् ।
अर्थकामा च या नारी राजानं स्यादुपस्थिता ।
अनुजीवी तथायुक्तां निध्यायन्दूयते च सः ।
तस्मान्नारीं न निध्यायेत्तथायुक्तां विचक्षणः ।
(28cd) तथा क्षुतं च वातं च निष्ठीवं चाचरेच्छनैः ।
न नर्मसु हसेज्जातु मूढवृत्तिर्हि सा स्मृता ।
(30cd) स्मितं तु मृदुपूर्वेण दर्शयेत प्रसादजम् ।
(28ab) न चाक्षौ न भुजौ जातु न च वाक्यं समाक्षिपेत् ।
न च तिर्यगवेक्षेत चक्षुर्भ्यां सम्यगाचरेत् ।
भ्रुकुटीं न च कुर्वीत न चाङ्गुष्ठैर्लिखेन्महीम् ।
न च गाढं विजृम्भेत जातु राज्ञः समीपतः ।
न प्रशंसेन्न चासूयेत्प्रियेषु च हितेषु च ।
श्रूयमाणेषु वा तत्र दृश्यमाणेषु वा पुनः ।
अथ संदृश्यमानेषु प्रियेषु च हितेषु च ।
श्रूयमाणेषु वाक्येषु वर्णयेदमृतं यथा ।
न राज्ञः प्रतिकूलानि सेवमानः सुखी भवेत् ।
पुत्रो वा यदि वा भ्राता यद्यप्यात्मसमो भवेत् ।
अप्रमत्तो हि राजानं रञ्जयेच्छीलसंपदा ।
उत्थानेन तु मेधावी शौचेन विविधेन च ।
स्नानं हि वस्त्रशुद्धिश्च शारीरं शौचमुच्यते ।
असक्तिः प्रकृतार्थेषु द्वितीयं शौचमुच्यते ।
राजा भोजो विराट् सम्राट् क्षत्रियो भूपतिर्नृपः ।
य एतैः स्तूयते शब्दैः कस्तं नार्चितुमर्हति ।
तस्माद्भक्तो हि युक्तः सन्सत्यवादी जितेन्द्रियः ।
मेधावी धृतिमान्प्राज्ञः संश्रयेत महीपतिम् ।
कृतज्ञं प्राज्ञमक्षुद्रं दृढभक्तिं जितेन्द्रियम् ।
वर्धमानं स्थितं स्थाने संश्रयेत महीपतिम् ।
एष वः समुदाचारः समुद्दिष्टो यथाविधि ।
यथार्थान्संप्रपत्स्यन्ते पार्थ राजोपजीविनः ।

[(L. 1) T_2 G_2 बलीयसा. — (L. 2) T_1 सेवेत; G_1 M_1 ईप्सितो. — (L. 6) $M_{1.4}$ अन्विच्छेत् (for अन्यस्य). G_3 प्रार्थये तु; M प्रार्थयीत. — (L. 8) G_2 परिगृह्याप°; G_3 परिनिंद्याप° (for the prior half). — (L. 11) T_1 $G_{2.3}$ $M_{4.5}$ अपि (for अथ). — (L. 14) G_1 मातृगोत्रेषु वा नाम्ना; G_2 मातृगोत्रेण गोत्रेण; G_3 °त्रे स्वगोत्रेण. G_1 पितृशीलेन वा पुनः. — (L. 15) M_{1-3} वसेत् (for भवेत्). — (L. 16) T_1 न चैनं; G_2 M_1 (also as in text).$_4$ नरान्न (for नरो न). — (L. 17) T $G_{1.2}$ नैनमाराधयेज्जातु; M_1 (also as in text) नैनमाराधयिष्यंति. G_1 गास्ताः शिष्यानिवारलान् (sic). — (L. 19) M_4 (*sup. lin.* as in text) संमतो (for सान्त्वितो). — After line 19, T_1 $M_{4.5}$ read lines 24–25. — (L. 20) M नात्मानमनुसंस्मरेत् ($M_{1.3}$ °रन्). — (L. 21) M °संहृष्टः. $M_{1.4}$ संकल्पः; $M_{2.3}$ संकल्पे (for निस्तन्द्री). — (L. 23) G_1 दुःखम्; G_2 समम् (for सुखम्). — T_1 $M_{4.5}$ read lines 24–25 after line 19. — M_3 om. lines 25–31. — (L. 25) G_2 अद्य; G_3 अस्य (for इति). T G_1 M_1 एवं. — (L. 26) G_3 राज्ञादिष्टो नरः सदा (for the posterior half). — (L. 27) M_1 आधिष्ठन्; M_2 आतिष्ठन्; $M_{4.5}$ आतिष्ठेत् (for आदिष्टो). — (L. 28) T_2 न यं; G_1 एवं; $G_{2.3}$ M_5 नैनं. — (L. 30) G_1 राजा (for लाभाद्), and इयं (for इयान्). T $G_{2.3}$ व्यथेच्चावमा°. — (L. 31) T_1 पूर्णा; G_1 M_1 पूर्णे (for पूर्ण-). — (L. 32) $G_{1.3}$ अल्पेच्छुः. T G धृतिमान् (for मति°). T G राज्ञः (for श्रीमान्). T_2 छायेवानुगतः. — (L. 33) T_1 नित्यं (for धीरः). T_1 M_{1-3} यो (for स). — (L. 34) T_2 °पुराणेषु; G_1 °पुरावृत्तः. — (L. 35) G_3 °न्यः सत्यवादी यः. — (L. 36) G_3 न मर्त्येषु (for मनु°). — (L. 37) G_3 परुषं; M परेषां (for पुरुषं). — (L. 38) T $G_{1.3}$ उप- (for अपि). — (L. 39) T_2 $G_{1.3}$ अपि (for हि). T_2 बंधनं; G_1 वधं वा; M_1 दंडं वा (for बन्धं वा). G_1 बंधम् (for वधम्). — (L. 40) M_{1-3} तुल्यावस्थि°. — (L. 42) G_1 श्रेयस्थं; M_{1-3} श्रेयांसि. M (except M_4) निष्ठितं (for the second कर्मणि). — (L. 44) M_3 transp. प्राज्ञः and मैत्रीं. M_{1-3} कदाचन (for कथं°). — (L. 45) G_1 रक्षणश्च; G_3 रक्षिणं; M_1 रक्षणं. — (L. 46) T_2 G_2 M_5 प्रेष्यं; G_1 प्रेक्ष्यं. — (L. 48) M (except M_4) स्त्रीभिस् (for स्त्रीषु). M तस्य (for कस्य). T_2 भूपतिं; G_{1-3} भूपतिः (for भूमिपः). — (L. 49) T_1 दुर्बलस्य बले स्थितः (for the posterior half). — (L. 51) T_1 $G_{2.3}$ प्रहृष्येत (for °ष्टः स्यात्). — (L. 53) T_1 तत्तस्यांतः°; T_2 G_1 तस्य चांतः°; $G_{2.3}$ तदास्यांतः°. T_2 वृत्तिम् (for वृत्तम्). — (L. 54) T $G_{2.3}$ °गता; G_1 °गतो. T G_1 च सर्वतः; $G_{2.3}$ तथैव च. — (L. 57) T_1 transp. राज्ञः and वृत्तिं. $M_{4.5}$ वृत्तं. G_1 बुधः (for बहिः). — (L. 61) M_1 सुनिर्दोषं (for सम°). — (L. 62) M_1 यः

अथ स्वविषयं प्राप्य यथाकामं चरिष्यथ ॥ ४४
युधिष्ठिर उवाच ।
अनुशिष्टाः स्म भद्रं ते नैतद्वक्तास्ति कश्चन ।
कुन्तीमृते मातरं नो विदुरं च महामतिम् ॥ ४५
यदेवानन्तरं कार्यं तद्भवान्कर्तुमर्हति ।
तारणायास्य दुःखस्य प्रस्थानाय जयाय च ॥ ४६

C. 4. 135
B. 4. 4. 53
K. 4. 6. 3

(for न). T2 G2 बाह्ये. T2 वाभ्यंतरे; G2 बाह्यांतरे (for वाभ्यन्तरो). — (L. 63) Hypermetric! G अनुजीवी (for °जीविनां). — (L. 65) G1 नोपजीवति; G3 °युज्येत. — (L. 66) G1 M1 अराजा न; G2 अराजं न. — (L. 67) G1 तं; G2 तु (for न). M प्रभुं(M5 प्रयुं)जानं हि को राजा (M4 भुंजानमिह को राजा). — (L. 70) T2 चापथ्येन; M2.3 चातिथ्यं न. — (L. 73) T1 द्विधापोच्छि°; G2 द्विधा हि च्छि°. T2 G1 M4 °सेविनः; M1.5 °जीविनां; M2.3 °सेविनं. — After line 73, M4 ins.:

121* अर्थाः सिध्यन्ति कौरव्य न चार्थाः प्रतियान्ति च ।

— (L. 74) M1 °तां यां, and °सीमां. T1 °धिपैः; T2 °धिपः. — (L. 78) G3 प्रसिद्धस्य; M1 विहीनस्य (for विरुद्ध°). M °ल्पचेतसः. — (L. 79) G2 भिद्यते; G3 जायते (for छिद्यते). G1 नयते (for जायते). — (L. 80) G1 उत्थितानां (for उद्धृ°), and कुपितानां (for कुहका°). — (L. 81) T1 राजतेषां; M4.5 °वेषः. T1 विस्पष्टान्; T2 G1 विद्विष्टं; M4.5 विस्पष्टः. — After line 81, G M4 ins.:

122* राजवेषं हि विस्पष्टं सेव्यमानो न वध्यते ।

(M4 °वेषः. G1 विद्विष्टं; M4 विधिना. G1 सेवानोपि न; M4 सेव्यमानेन. G2 वर्धते; M4 सेव्यते.) — (L. 82) M2.3 शत्रुभिः (for बान्धवैः). — (L. 85) T1 G1 M1–3.5 स्त्रीभिर् (for त्रिभिर्). — (L. 87) T1 राज्ञाभिसत्कारं; M5 राज्ञोथ सत्कारं. — (L. 88) T1 G2.3 न संसज्येत कर्हिचित् (for the posterior half). — (L. 89) T2 M5 चाप्या°; G1 चान्य°; G2.3 चान्या°. G1 संदिष्टोपि (for असंदिष्टो). — (L. 91) M4(*sup. lin.*; orig. as above) प्रलब्धम्; M5 अबद्धम् (for प्रबन्धम्). M4 (marg.) repeats this line (with v. l. ह्यबद्धम् for प्रबन्धम्). — (L. 92) M2.3 व्यलीके (for व्यलीक-). — (L. 94) G1.2 °जीवितया (G1 °यो) युक्तां. T2 G2.3 M5 दूष्यते. M1 च कः; M2.3 नरः; M4 वशः; M5 परं (for च सः). — (L. 96) M1–3 ष्ठीवनं; T2 ष्ठीवं च (for निष्ठीवं). G1 अपरैः (for आचरेत्). — (L. 97) M4.5 ना (for न). — (L. 98) M1–3 स्मृतं (for स्मितं). T2 M1.4.5 दर्शयीत. — (L. 99) M4(*sup. lin.* as in text).5 पादौ (for वाक्यं). M4(*sup. lin.*; orig. as in text).5 प्रासारयेत् (for समाक्षिपेत्). — (L. 101) G2 M5 भ्रुकुटिं. — (L. 104) Om. in M1. T G2 M4 स्तूयमानेषु (for श्रूय°). M5 वाक्येषु (for वा तत्र). M2.3 ततः (for पुनः). — M1 om. line 105. — (L. 106) T2 कंठयेत्; G1 कर्णयोः (for वर्णयेद्). — (L. 107) M1 न राज्ञां प्रतिकूलेषु. — (L. 108) M1.4.5 अस्य (for अपि). M2.3 सखा; M5 -पि वा (for भवेत्). — (L. 110) T1 M5 द्विविधेन; T2 विनयेन. T M2.3 तु (for च). — (L. 112) Om. in G1. M4.5 प्राकृ°. — (L. 113) G1.3 M1–3 राज- (for राजा). G1.2 नृपतिः (for भूपतिः). T1 G3 M1–3 नृप; G1 पतिः. — (L. 116) M2.3 वृत्ति°; M5 स्मृति° (for धृति°). T2 M2 संश्रयीत; G1 स सेवेत. — (L. 117) Om. in G2. G1.3 °भक्तं. — (L. 118) Om. in G2. T2 G1 M2 संश्रयीत. — (L. 119) G2.3 युधिष्ठिर; M3 महीपतिं; M4 यथामति. — (L. 120) M यथार्थाः. T1 M4 (*sup. lin.*) °पद्यंते; G3 °पत्स्यंतः; M1 °कल्पंते; M2.3 °कल्प्यंते. T2 G पार्थाः. M1.5 °जीविनां; M2.3 °जीविभिः.]

44 D9 missing (cf. v. l. 30). — [a]) Dn2 D11 M (except M5) इदं; Cn इमं (as in text). B3 ताताः; B4 D6 तातः; D5 S तावत्. — [b]) K1 यथाशीलं; K2 यथाचारा; D2.4.8 यथाशीला; S एवंशीला; Ca.v as in text. B2.3.5 Dn D4.11.12 T2 G1 M4 Cs बुभूषत (cf. Cv); D2 बभूवथ; T1 G2.3 M5 °षथ; M1 °षतः; M3.4 (*sup. lin.*) °षया. — [c]) B2.3 स्वसमयं; B4 इमं विषयं (for स्ववि°). — [d]) B1.5 Dn2 D11.12 T2 M2 Cn.s करिष्यथ. — After 44, S ins.:

123* वैशंपायनः ।
तं तथेत्यब्रुवन्पार्थाः पितृकल्पं यशस्विनम् ।
प्रहृष्टाश्चाभिवाद्यैनमुपातिष्ठन्परंतपाः ।
तेषां प्रतिष्ठमानानां मन्त्रांश्च ब्राह्मणोऽजपत् ।
भवाय राष्ट्रलाभाय पराय विजयाय च ।

[(L. 1) M ते (for तं). M1.3.4 ऋषिकल्पा; M2.5 ऋषिकल्पं. — (L. 4) G2 क्षेमाय; G3 भव्याय (for भवाय). M2 वराय (for पराय).]

Thereafter T2 G M1.3–5 ins. a colophon (*adhy. no.*: T2 4; G M1.3–5 5); on the other hand, T1 M2 (om. lines 1, 4–5) cont.:

124* ततोऽब्रवीदसौ विप्रो वाचमाशीः प्रयुज्य च ।
स्वद्रव्यप्रतिलाभाय शत्रूणां मर्दनाय च ।
स्वस्ति वोऽस्तु शिवः पन्था द्रक्ष्यामि पुनरागतान् ।
इत्युक्ता हृष्टमनसो गुरुणा तेन धीमता ।
युधिष्ठिरमुखाः सर्वे गन्तुं समुपचक्रमुः ।,

which is followed by a colophon (*adhy. no.*: 5). Thereafter S begins a fresh adhy. with 49[ab] (preceded by वैशंपायनः).

C. 4. 4. 136
B. 4. 4. 54

वैशंपायन उवाच ।

एवमुक्तस्ततो राज्ञा धौम्योऽथ द्विजसत्तमः ।
अकरोद्विधिवत्सर्वं प्रस्थाने यद्विधीयते ॥ ४७
तेषां समिध्य तानग्नीन्मन्त्रवच्च जुहाव सः ।
समृद्धिवृद्धिलाभाय पृथिवीविजयाय च ॥ ४८
अग्निं प्रदक्षिणं कृत्वा ब्राह्मणांश्च तपोधनान् ।
याज्ञसेनीं पुरस्कृत्य षडेवाथ प्रवव्रजुः ॥ ४९

इति श्रीमहाभारते विराटपर्वणि चतुर्थोऽध्यायः ॥ ४ ॥

५

वैशंपायन उवाच ।

ते वीरा बद्धनिस्त्रिंशास्ततायुधकलापिनः ।
बद्धगोधाङ्गुलित्राणाः कालिन्दीमभितो ययुः ॥ १
ततस्ते दक्षिणं तीरमन्वगच्छन्पदातयः ।

---

45 D9 missing (cf. v. l. 30). — ^{a}) S °शिष्टोस्मि. — ^{b}) T G1 तत् (for एतद्). — ^{c}) K1 D5 वा; D1–3. 10 G2. 3 M च (for नो). — ^{d}) T M1. 3 पितरं (for विदुरं). B Dn D4–8. 11. 12 वा (for च).

46 D9 missing (cf. v. l. 30). — ^{a}) K अत्र (for एव). — ^{b}) Dn1 D2. 4. 5. 7. 10 S वक्तुम् (for कर्तुम्). A few MSS. अर्हसि. — ^{c}) D5 वारणाय. T G1 तु; G2. 3 M सु- (for अस्य). — ^{d}) T1 G भवाय; T2 M अभयाय (for जयाय).

47 D9 missing (cf. v. l. 30). T2 om. 47–48; T1 G M om. 47.

48 D9 missing (cf. v. l. 30). T2 om. 48 (cf. v. l. 47). — ^{b}) K आदरात् (for मन्त्रवत्). K D8 transp. च and सः. — For 48, S (T2 om.) subst.:

125* तेषां प्रतिष्ठमानानां धौम्यो मन्त्रांस्तथाजपत् ।
सर्वविघ्नप्रशमनानर्थसिद्धिकरांस्तथा ।
ततः पावकमुज्ज्वाल्य मन्त्रहव्यपुरस्कृतम् ।

[(L. 1) T1 G1 अथ; M1. 3. 5 तदा (for तथा). — (L. 2) G2. 3 सर्व° (for अर्थ°).]
Thereafter S (except T2) reads 49^{cd}.

49 D9 missing (cf. v. l. 30). S reads 49^{ab} after the colophon mentioned at the end of v. l. 44. Before 49^{ab}, D6 S ins. वैशं°. — ^{a}) B2 Dn1 D1–3. 7. 8. 10 अग्नीन्; T1 G2. 3 M तेग्निं; T2 तेग्नीन्; G1 ते तं (for अग्निं). B4 Dn1 D8. 10. 11 T2 प्रदक्षिणीकृत्य; D5 G3 °क्षिणीकृत्वा. — ^{b}) S ब्राह्मणं च (T M1–3 °णांश्च) पुरोहितं. — After 49^{ab}, S (except T2) ins.:

126* अभिवाद्य ततः सर्वे प्राद्रवन्सह कृष्णया ।

[T G1. 3 प्रस्थातुमुपचक्रमुः (for the posterior half).] — S (except T2) reads 49^{cd} after 125* (cf. v. l. 48). — ^{d}) D1–3 पांडवास्ते प्र°; D4. 7 पांडवाथ प्र°; S सर्वे एव महारथाः. — After 49, N (D9 missing for lines 1–3) ins.:

127* गतेषु तेषु वीरेषु धौम्योऽपि जपतां वरः ।
अग्निहोत्राण्युपादाय पाञ्चालानभ्यगच्छत ।
इन्द्रसेनादयश्चैव यथोक्ताः प्राप्य यादवान् ।
रथानश्वांश्च रक्षन्तः सुखमूषुः सुसंवृताः ।

[Cf. 140*. — (L. 1) B1. 3 पार्थेषु; B2 D2 धीरेषु; Dn2 D11. 12 दूरेषु (for वीरेषु). B (except B4) Dn D5–7. 11. 12 अथ (for अपि). — (L. 2) Many MSS. पंचालान्. D4 अभ्यपद्यत. — (L. 3) D1. 3 इमान्; D8 अपि; D10 अथ (for एव). K1 D1–3. 5 यथोक्तान्; D7 यथोक्तं. — (L. 4) D4 सुसंयताः; D5 सुसंहताः.]
D8 (corrupt) cont.:

128* तेन व्यपुर्यदुदरे मुदिताः परिवारिताः ।
इति युधिष्ठिरशासनमक्ष्यते
नतिपरा रथसूतससादिनः ।
द्रुततरं समुपेत्य तदा सुत
प्रतिदिनं व्यदधुर्हृदि मङ्गलम् ।

On the other hand, S (except T2) ins. after 49:

129* प्राद्रवन्सह धौम्येन बद्धशस्त्रा वनाद्वनम् ।

Colophon. — *Adhy. name:* B1. 3 D10 धौम्यवाक्यं; B2. 5 D6 धौम्यशिक्षा; B4 धौम्यशिक्षा अज्ञातवासप्रस्थानं; D1–3 धौम्यानुशासनमानुयात्रिकसंप्रेषणं (D2 °त्रिकमंत्रणं); D4 धौम्यानुशासनं; G2 M1 अनुजीविवृत्तकथनं (M1 °जीविवर्तनं). — *Adhy. no.* (figures, words or both): K B4 D5–7. 9. 10 T2 4; D4 3; T1 G M 5. — *S'loka no.:* D1 55; G3 78.

5

1 S (except T2) om. वैशं°. — ^{b}) K यथायुध°; B1 Dn D2. 4. 7. 9. 11. 12 तथा बद्ध°; D1. 3. 8 तथायुध°; D5 तत्रायुध°; S धनुर्बाण°; Ca. np as in text. ❀ Cs: पाठान्तरे सज्जीकृतधनुषः । (cf. Cn) ❀ — ^{cd}) S अगच्छन्भीमधन्वानः

वसन्तो गिरिदुर्गेषु वनदुर्गेषु धन्विनः ॥ २
विध्यन्तो मृगजातानि महेष्वासा महाबलाः ।
उत्तरेण दशार्णांस्ते पाञ्चालान्दक्षिणेन तु ॥ ३
अन्तरेण यकृल्लोमाञ्शूरसेनांश्च पाण्डवाः ।
लुब्धा ब्रुवाणा मत्स्यस्य विषयं प्राविशन्वनात् ॥ ४
ततो जनपदं प्राप्य कृष्णा राजानमब्रवीत् ।
पश्यैकपद्यो दृश्यन्ते क्षेत्राणि विविधानि च ॥ ५
व्यक्तं दूरे विराटस्य राजधानी भविष्यति । C. 4. 147 B. 4. 5. 6 K. 4. 6. 17

काम्यकाद्यमुनां नदीं. — After 1, S reads 3^{c}–4^{b}.

2 ^{a}) Cc, rp तस्याः; Cr ततः (as in text). D6 T G ते तस्या; M1–3 कालिंदी-; M4. 5 कालिंद्या (for ततस्ते). G2. 3 कूलं (for तीरं). — B2 ins. after 2^{ab}: D6, after 2:

130* सिंहान्व्याघ्रान्वराहांश्च मारयन्ति च सर्वशः ।
[D6 सारवंतश्च सर्वतः.]

N ins. after 2^{ab} (B2, after 130*):

131* निवृत्तवनवासा वै स्वराष्ट्रं प्रेप्सवस्तदा ।
[K1 °वासा यैः; K2 °त्ता वनवासाद्यैः; B1. 3. 5 Dn D11. 12 °वासा हि; B2 °त्ता वनवासा हि; B4 D2. 6 °त्ता वनवासाद्धि; D5 निर्गता वनवासाद्धि; D7 °वासाद्धि; D8. 10 °वासास्ते. K1 D1. 3. 5. 9 स्वराष्ट्र-; B2 स्वराज्यं; D4 स्वराज्य-. B3. 5 D1–3 तथा; D4. 12 सदा.]

On the other hand, S ins. after 2^{ab}:

132* ततः प्रत्यक्प्रयातास्ते संक्रामन्तो वनाद्वनम् ।

— ^{cd}) S (except M1. 3) वसाना (for वसन्तो). D8 transp. गिरि° and वन°. S वन° (for गिरि°). D4 S रमणीयेषु (for वन°). D7. 9 धन्विनः कवचान्विताः (for वन° etc.). — After 2, D6 ins. 130*; while S ins.:

133* पल्वलेषु च रम्येषु नदीनां संगमेषु च ।
द्रुमान्नानाविधाकारान्नानाविधलताकुलान् ।
कुसुमाढ्यान्मनःकान्ताञ्शुभगन्धमनोरमान् ।
[(L. 3) T2 M4. 5 °गन्धान्मनो°.]

T1 cont.:

134* चम्पकान्बकुलांश्चैव पुंनागान्केतकीस्तथा ।
पारिभद्रान्करञ्जांश्च अन्यांश्च विविधान्द्रुमान् ।

T1 cont.: G M ins. after 133*:

135* पार्था निरीक्षमाणाश्च तान्द्रुमान्पुष्पमालिनः ।
जिघ्रन्तः पुष्पगन्धांश्च सुसुगन्धान्मनोरमान् ।
[(L. 1) T2 पुष्पशालिनः.]

3 ^{a}) K मृगजातीश्च; B5 D7. 9 °यूथानि. — After 3^{ab}, S ins.:

136* उषित्वा द्वादश समा वने परपुरंजयाः ।

— S reads 3^{c}–4^{b} after 1. — ^{c}) B4 °र्णान्वै; D6. 10 °र्णास्तु; S °र्णानां. — ^{d}) A few MSS. पंचालान्. K B2. 5 D (except D6. 7. 9) च (for तु). Ca cites entire line as in text.

4 For S cf. v. l. 3. — ^{a}) B3. 4 D6 सकृल्लो°; D1–3. 8 बृहल्लो°; D7 तु मत्स्यानां; S यकृल्लोम्नां (T G1 °म्नः); Cv as in text. K अनंतरेण स(K1 श)कृल्लोमा(K2 °मान्). ❀ Ca: यकृल्लोमशूरसेनानां मध्येन ।❀ — ^{b}) D7. 9 पटच्चरान् (for च पाण्डवाः). Ca cites पांडवाः. — ^{c}) K2 D1m गुणान्; D2 लुब्धान्; D7 लब्धुं; D10 ऋद्धिं; S वेदं (T2 देशं; G1 देवं; M5 वेदान्). D6 कराला; D7 प्रसादं; G2 पुराणं (for ब्रुवाणा). S (except T1 G1) मात्स्य°. Cc cites लुब्धाः, Cr. v लुब्धा ब्रुवाणाः. — ^{d}) B4 D3 विषयान्. S तदा (for वनात्). K प्राविशन्विषयं शनैः. — Cs cites (in prose order) मत्स्यस्य लुब्धा ब्रुवाणा विषयं प्राविशन्; Ca cites entire line as in text. — After 4, N ins.:

137* धन्विनो बद्धनिस्त्रिंशा विवर्णाः श्मश्रुधारिणः ।
[K °स्त्रिंशान्. K2 विवर्णान्. K1 विवर्णे अपयुधा° (sic).]

B1. 3 D5 cont.:

138* गवाढ्यमर्थसंपन्नं हृष्टपुष्टजनावृतम् ।
[B1 °मनुसं°; B3 °मन्नसं°. D5 °समायुतं (for °जनावृतम्).]

On the other hand, S ins. after 4:

139* तत्र धौम्यं महात्मानं पाण्डवेया व्यसर्जयन् ।
अग्निहोत्रं परिचरन्सोऽबुद्धोऽवसदाश्रमे ।

T1 cont.:

140* ततस्तेषु प्रयातेषु पाण्डवेषु महात्मसु ।
इन्द्रसेनमुखाश्चैव यथोक्तं प्राप्य निर्वृताः ।
रथानश्वांश्च रक्षन्तः सुखमूषुः सुसंवृताः ।
[Cf. 127*.]

5 Before 5^{cd}, S (except G1 M2) ins. द्रौपदी. — ^{c}) K M3. 4 (*sup. lin.* as in text) एकपल्यो; all *comm.* एकपद्यः (as in text); Crp (Dev.) एकपद्याः and एकमार्गाः (?). B1. 3 प्रासादाः पथि दृ°. — ^{d}) D4 च गृहाणि (for विविधानि). S क्षेत्र(T2 °त्रं; M5 °त्रे)गो(T1 को)ष्ठसमावृताः (M1 °वृते; M4 *sup. lin.* °गताः; M5 °श्रिताः). — After 5, S ins.:

141* वृक्षांश्चोपवनोपेतान्ग्रामाणां नगरस्य च ।

6 ^{c}) B Dn D1–7. 10–12 °मेहापरां (Cr also अपरां) रात्रिं; D8 वसामोद्यात्र वै रात्रिं; D9 °ह वयं रात्रिं; T2 G1 वसामोत्र परां रा°. — After 6, D6 ins.:

142* तच्छ्रुत्वा वचनं तस्याः प्राह राजा युधिष्ठिरः ।;

while S (M om. line 1) ins.:

143* युधिष्ठिरः ।
इमां कमलपत्राक्षीं द्रौपदीं माद्रिनन्दन ।
बाहुभ्यां परिगृह्यैनां मुहूर्तं नकुल व्रज ।

C. 4. 147
B. 4. 5. 6
K. 4. 6. 17

वसामेह परां रात्रिं बलवान्मे परिश्रमः ॥ ६

युधिष्ठिर उवाच ।

धनंजय समुद्यम्य पाञ्चालीं वह भारत ।
राजधान्यां निवत्स्यामो विमुक्ताश्च वनादितः ॥ ७

वैशंपायन उवाच ।

तामादायार्जुनस्तूर्णं द्रौपदीं गजराडिव ।
संप्राप्य नगराभ्याशमवतारयदर्जुनः ॥ ८

स राजधानीं संप्राप्य कौन्तेयोऽर्जुनमब्रवीत् ।
क्वायुधानि समासज्य प्रवेक्ष्यामः पुरं वयम् ॥ ९

सायुधाश्च वयं तात प्रवेक्ष्यामः पुरं यदि ।
समुद्वेगं जनस्यास्य करिष्यामो न संशयः ॥ १०

ततो द्वादश वर्षाणि प्रवेष्टव्यं वनं पुनः ।

नेतो दूरे विराटस्य नगरं भरतर्षभ ।
राजधान्यां निवत्स्यामः सुमुक्तमिव नो वनम् ।
नकुलः ।
पूर्वाह्णे मृगयां गत्वा वने विद्धा महामृगाः ।
अटवी च मया दूरं सृता मृगवधेप्सुना ।
विषमा ह्यतिदुर्गा च वेगवत्परिधावता ।
सोऽहं घर्माभितप्तो वै नैनामादातुमुत्सहे ।
युधिष्ठिरः ।
सहदेव त्वमादाय मुहूर्तं द्रौपदीं नय ।
राजधान्यां निवत्स्यामः सुमुक्तमिव नो वनम् ।
सहदेवः ।
अहमप्यस्मि तृषितः क्षुधयाभिप्रपीडितः ।
श्रान्तो घर्माभितप्तो वै नैनामादातुमुत्सहे ।

[M transp. lines 2 and 3. — (L. 2) T_2 transp. बाहु° and मुहू°. M °भ्यां नकुलादाय. T_1 °र्तं नकुलोद्वह; M °र्तं द्रौपदीं नय. — (L. 3) M इतो दूरे (*or* दूरं). T_1 G नगरी. — (L. 5) G_2 M_5 मया (for महा-). — (L. 6) G_2 श्रांता; M_4 (*sup. lin.* as above) गता (for सृता). — (L. 11) T_1 G_2 $M_{1.5}$ खिन्नश्च (for तृषितः). T_2 G_2 °या परिपी°; M_5 °या च प्रपी°. — (L. 12) T_2 परिश्रांतश्च भद्रं ते (for the prior half).]

7 ^{ab}) $B_{1.3}$ उपागम्य; D_5 समुद्गम्य. D_{1-3} द्रौपदीं (for पाञ्चालीं). — For 7^{ab}, S subst:

144* एहि वीर विशालाक्ष वीरसिंह इवार्जुन ।
इमां कमलपत्राक्षीं द्रौपदीं द्रुपदात्मजाम् ।
परिगृह्य मुहूर्तं त्वं बाहुभ्यां कुशलं व्रज ।

[(L. 1) T_2 G_1 भो भो (for एहि). T_1 G M_1 द्रुत° (for वीर°).]

— ^{c}) $D_{4.8}$ °धानीं. D_8 प्रवेश्यामो (for निव°). — ^{d}) D_4 तु; $D_{8.10}$ स्म (for च). S सु(G M_3 वि)मुक्तमिव नो वनं (cf. 143*).

8 After वैशं°, S ins.:

145* गुरोर्वचनमाज्ञाय संप्रहृष्टो धनंजयः ।

— ^{a}) M_4 ततः (for अर्जुनस्). S पार्थः (for तूर्णं). — ^{b}) B_2 नाग°; D_4 पक्षि°; S हस्ति° (for गज°). — After 8^{ab}, S ins.:

146* प्रवव्राज महाबाहुरर्जुनः प्रियदर्शनः ।
जटिलो वल्कलधरः शरतूणधनुर्धरः ।
स्कन्धे कृत्वा वरारोहां बालामायतलोचनाम् ।

[(L. 1) $M_{2.5}$ °दर्शनां; M_3 परवीरहा. — (L. 2) T_2 G_2 °तूणी.]

— ^{c}) S (M_4 *sup. lin.*) आनीय (M_{2-4} आगम्य) (for संप्राप्य). Some MSS. अभ्यासं. — ^{d}) B_4 $D_{5.7}$ अवा°. K_2 M (except M_5) अच्युतः (for अर्जुनः). $D_{1.3.4}$ G_1 °यतार्जुनः (D_4 °च्युतः). — After 8, S ins. (an additional) colophon (*adhy. no.: 6*).

9 Before 9, S reads वैशं°. — ^{b}) S पार्थिवो (for कौन्तेयो). — ^{c}) D_4 समावेश्य; D_{10} समाधाय; Cc as in text. — ^{d}) D_{1-3} प्रविशामः. — For 9^{cd}, S subst.:

147* इमानि पुरुषव्याघ्र आयुधानि परंतप ।
कस्मिन्न्यासयितव्यानि गुप्तिश्चैषां कथं भवेत् ।

10 ^{ab}) D_4 S हि (for च). K समं (for वयं). B D (except D_{1-4}) transp. वयं तात and प्रवे°. — ^{cd}) D_4 आशंकां तु (for समु°). $D_{8.10}$ पुर° (for जन°). B_2 D_{4-6} transp. जनस्यास्य and करि°. — After 10, B Dn $D_{5.6.10-12}$ S ins.:

148* गाण्डीवं च महद्गाढं लोके च विदितं नृणाम् ।
तच्चेदायुधमादाय गच्छामो नगरं वयम् ।
क्षिप्रमस्मान्विजानीयुर्मनुष्या नात्र संशयः ।

[(L. 1) S हि (for च). D_5 महाह्लादं; D_6 महागाढं; D_{10} महाभागं; S नरव्याघ्र (M_3 महच्चापं). $B_{1.3}$ धनुः (for नृणाम्). S त्रिषु लोकेषु विश्रुतं (for the posterior half). — After line 1, S ins.:

149* कथं नाविष्कृताः स्यामो धार्तराष्ट्रस्य मारिष ।

— (L. 2) T G यदीदं धनुरादाय. D_5 M_{3-5} गच्छेम; M_2 गच्छाम. T G चरेम सजने पुरे (T_2 पदे). Ca cites तच्चेदायुधं, Cr तच्चेत्, Crp (Dī.) तदेव. — (L. 3) $D_{5.6}$ क्षिप्रं नः संविजा°; T G क्षिप्रं नः प्रतिजा°; M क्षिप्रं नः संप्रजा°.]

D_5 marg. cont.:

150* आशंकां च करिष्यामो जनस्यास्य न संशयः ।

एकस्मिन्नपि विज्ञाते प्रतिज्ञातं हि नस्तथा ॥ ११

अर्जुन उवाच ।

इयं कूटे मनुष्येन्द्र गहना महती शमी ।
भीमशाखा दुरारोहा श्मशानस्य समीपतः ॥ १२
न चापि विद्यते कश्चिन्मनुष्य इह पार्थिव ।
उत्पथे हि वने जाता मृगव्यालनिषेविते ॥ १३
समासज्यायुधान्यस्यां गच्छामो नगरं प्रति ।
एवमत्र यथाजोषं विहरिष्याम भारत ॥ १४

वैशंपायन उवाच ।

एवमुक्त्वा स राजानं धर्मात्मानं युधिष्ठिरम् ।
प्रचक्रमे निधानाय शस्त्राणां भरतर्षभ ॥ १५
येन देवान्मनुष्यांश्च सर्पांश्चैकरथोऽजयत् । C. 4. 159 B. 4.5.18 K. 4.7.19

---

11 S transp. 11^{ab} and 11^{cd}. — ^{a}) S भूयो (M3 बुध्या) (for ततो). — ^{b}) K2 D1–3 वनवासो; B3 D5–7.9 वस्तव्यानि; S प्रविशेम (for प्रवे°). K2 D1–3 हि नः; B1.3–5 Dn D5–7.9.11.12 वने; T2 G3 M1–3.5 वयं (for वनं). T1 G1.2 M4 वयं; T2 G3 M1–3.5 वनं (for पुनः). K1 प्रवेष्टव्यानि नः पुनः. Cv cites (in prose order) न एकस्मिञ्ज्ञातेऽपि. — D10 om. 11^{cd}. — ^{d}) B3 D5 °ज्ञानं; D3 °ज्ञाते; D4 °ज्ञाता; D8 परिज्ञाता. B2 पुरा; D5.7 तदा (for तथा). Cv cites नस्तथा. S समयं न (T2 G2.3 नो; G1 ना-) व्यतीत्य च. — After 11, S (M1.2 om. lines 1 and 2) ins.:

151* तस्माच्छस्त्राणि सर्वाणि प्रच्छाद्यान्यत्र यत्र वा ।
प्रविशेम पुरं श्रेष्ठं तथा सम्यक्कृतं भवेत् ।
वैशंपायनः ।
अजातशत्रोर्वचनं श्रुत्वा चैव महायशाः ।
उवाच धर्मपुत्रं तमर्जुनः परवीरहा ।

[(L. 1) T2 G2.3 transp. शस्त्राणि and सर्वाणि. M3 प्रच्छन्नं न्यस्य यत्र ह; M4 प्रच्छन्नान्यत्र तत्र वै (*sup. lin.* प्रच्छन्नं न्यस्य कुत्रचित्); M5 प्रच्छन्नान्यत्र यत्र वा. — (L. 2) T2 पुरश्रेष्ठं.]

12 S om. अर्जुन उ°. — ^{a}) S वने (for कूटे). — ^{b}) B4 D1.3.5.7 Cr गहने; Cc.v.rp (Catur.) as in text. D8 वर्तते; Ca.v महती (as in text). S महती दृश्यते शमी.

13 S transp. 13^{ab} and 13^{cd}. — ^{a}) D6.9m अत्र; D9 अद्य (for अपि). S न चास्यां चारयि(T G संचरि-; M1 च चरि)ष्यंति. — ^{b}) K2 Dn1 इव; B Dn2 D5–12 इति (for इह). K भारत; B D (except D1–4) मे मतिः (for पार्थिव). S मनुष्याः पार्थ (T2 पथि) केचन (G2.3 कानने). — After 13^{ab}, N ins.:

152* योऽस्मान्निदधतो द्रष्टा भवेच्छस्त्राणि पार्थिव ।

[D1–3.8 दृष्ट्वा (for द्रष्टा), and हरेत् (for भवेत्). B3 D4–6.8.10 अस्त्राणि (for शस्त्राणि). B1.3 D4 भारत; B2.4.5 D2.5–7.9.10 पांडव; Dn D11.12 पांडवाः; D8 पांडवः. Cc cites (in prose order) शस्त्राणि निदधतोऽस्मान् द्रष्टा भवेत्. Ca.v cite निदधतः.]

S transp. 13^{ab} and 13^{cd}, and then after 13^{ab} ins.:

153* धनुर्भिः पुरुषं कृत्वा चर्मकेशास्थिसंवृतम् ।
उद्बन्धमिव कृत्वा च धनुर्ज्यापाशसंवृतम् ।

[(L. 2) M मनुजं (M5 पुरुषं) पाश°.]

M cont.: T G ins. after 14:

154* एवं परिहरिष्यन्ति मनुष्या वनचारिणः ।

T G cont.: M ins. after 14:

155* अत्रैवं नावबुध्यन्ते मनुष्याः केचिदायुधम् ।

— ^{c}) S °थे चापि जातेयं. — ^{d}) K1 D6 मृगव्याडनि°; T G अमनुष्य° (G1 °ष्यानुषेवितं); M निर्जने गहने वने. — After 13, T2 ins.:

156* विपुलाकीर्णशाखा च वायसैरुपसेविता ।
स्नेहानुबद्धां पश्यामि दुरारोहामिमां शमीम् ।

T2 cont.: N ins. after 13:

157* समीपे च श्मशानस्य गहनस्य विशेषतः ।

[Dn2 D11 वा; D1–3 हि (for च). D10 समीपतः (for °पे च). D4 दुःप्रवेशे (for गह°).]

14 ^{a}) B2 Dn D11.12 समाधायायुधं शम्यां. Ca cites समासज्य. S अस्यामायुधमासज्य. — ^{b}) T G1 M गच्छाम (M2 गच्छेम). B1.3.4 D4 S वयं (for प्रति). — ^{c}) B (except B2) Dn D5.6.11.12 यथायोगं; D2.4.8.10 °सौख्यं; Ca.c °जोषं (as in text). — ^{d}) S विहराम (G1 विच°; G2.3 °रामो; M1 °रेम) यथासुखं. — After 14, T G ins. 154*, M ins. 155*, and finally K2 ins. a passage given in App. I (No. 2).

15 M1–3 om. वैशं°. — ^{b}) B1.3 धर्मपुत्रं; B2 Dn1 D4 धर्मराजं (for धर्मा°). S धनंजयः (for युधि°). — After 15, S ins.:

158* तानि सर्वाणि संनह्य पञ्च पञ्चाचलोपमाः ।
आयुधानि कलापांश्च निस्त्रिंशांश्चातुलप्रभान् ।

[(L. 1) T1 G3 संगृह्य. M (except M2) °चलोपमान्. — (L. 2) M5 कलापानि. M1.3.4 (*sup. lin.* as in text) °तुलोपमान्; M5 °चलप्रभान्.]

T1 G (G1 om. line 3) cont.:

159* ततो युधिष्ठिरो राजा सहदेवमुवाच ह ।

C. 4. 159 B. 4. 5. 18 K. 4. 7. 20 स्फीताञ्जनपदांश्चान्यानजयत्कुरुनन्दनः ॥ १६
तदुदारं महाघोषं सपत्नगणसूदनम् ।
अपज्यमकरोत्पार्थो गाण्डीवमभयंकरम् ॥ १७
येन वीरः कुरुक्षेत्रमभ्यरक्षत्परंतपः ।
अमुञ्चद्धनुषस्तस्य ज्यामक्षय्यां युधिष्ठिरः ॥ १८
पाञ्चालान्येन संग्रामे भीमसेनोऽजयत्प्रभुः ।
प्रत्यषेधद्बहूनेकः सपत्नांश्चैव दिग्जये ॥ १९
निशम्य यस्य विस्फारं व्यद्रवन्त रणे परे ।
पर्वतस्येव दीर्णस्य विस्फोटमशनेरिव ॥ २०
सैन्धवं येन राजानं परामृषत चानघ ।
ज्यापाशं धनुषस्तस्य भीमसेनोऽवतारयत् ॥ २१
अजयत्पश्चिमामाशां धनुषा येन पाण्डवः ।

आरुह्येमां शमीं वीर निधत्स्वेहायुधानि नः ।
इति संदिश्य तं पार्थः पुनरेव धनंजयम् ।
अब्रवीदायुधानीह निधातुं भरतर्षभ ।

16 Before 16, T_1 G_2 ins. वैशं°; G_3 युधिष्ठिरः. — After 16^a, S ins.:

160* पिशाचोरगराक्षसान् ।
निवातकवचांश्चापि पौलोमांश्च परंतपः ।
कालकेयांश्च दुर्धर्षान्.

— ^{b}) B (except B_4) Dn_2 $D_{1.3.6.10-12}$ S सर्वांश्च (for सर्पांश्च). — ^{d}) K $B_{1.3.5}$ Dn $D_{7.9.11.12}$ कुरुपुंगवः; B_4 °नंदन; D_{1-8} पांडु°.

17 ^{a}) D_5 T_1 M_2 तं (for तद्). T_1 G M उदग्रं (for उदारं). T_2 तदग्रं च (for तदु°). B (except B_5) $D_{1-5.7.8.10}$ T G_1 M_1 महाघोरं; $G_{2.3}$ °वेगं. — ^{b}) K °सेवितं; Dn $D_{11.12}$ संपन्नबल°; D_2 °जन°. — ^{c}) S (except T_2) असज्यं. — ^{d}) $D_{3.4.7.9}$ गांजीवं. B Dn_2 $D_{3.5.6.11.12}$ सु- (D_3 स; D_6 च)भयंकरं (for अभ°).

18 M_3 om. 18^{ab}. — S ins. after 18^{ab} (M_3, om. lines 1 and 2, after 17):

161* जृम्भिते च धनुष्यस्त्रं न्यासार्थं नृपसत्तमः ।
धर्मपुत्रो महातेजाः सर्वलोकवशीकरम् ।
भुजंगभोगसदृशं मणिकाञ्चनभूषितम् ।
वित्रासनं दानवानां राक्षसानां च नित्यशः ।

[(L. 1) $G_{2.3}$ धनुश्रेष्ठे; $M_{1.4}$ (*sup. lin.*) धनुष्यस्मिन्; M_5 °ष्यत्र. T_1 अजृंभयत तच्छ्रेष्ठं. — (L. 2) T_1 °वशंकरं; $G_{2.3}$ °वशीकृतं. — (L. 3) T_1 $M_{1.4}$ मणिप्रवर°; $G_{1.3}$ °भूषणं; G_2 महाकांचन°.]

— ^{cd}) S धनूरत्नं महातेजा जृंभयामास पांडवः.

19 ^{a}) A few MSS. पंचालान्. — ^{c}) D_4 प्रत्ययुध्यत्; G_1 विप्रषेधत्. — ^{d}) S (except $M_{1.2}$) अपि (for एव).

20 ^{a}) S (except T_1) Ca विष्फारं; Cc as in text. — ^{b}) B_1 व्यद्रव्यंश्च; B_4 $D_{1.7-9}$ S विद्रवंति; B_5 प्राद्रवंत; D_4 विद्रवंते. Dn_1 रणात् (for रणे). $B_{1.3}$ रिपून् (for परे).

21 ^{a}) $D_{5.7}$ चैव (for येन). M_5 संग्रामे (for राजानं). — ^{b}) $B_{2.4}$ $D_{4.10}$ Ca. c पर्यामृषत; B_5 $D_{1-3.6}$ पर्यामृशत; D_5 पर्यामर्षत; D_7 पर्यमर्षत; D_9 प्रत्यषेधत; Cv as in text. B (except B_2) $D_{2.5-8}$ चानघः (D_8 °घं); D_4 भारत; D_9 पांडवः. Dn $D_{11.12}$ पर्यामृषितवानथ; S जित्वा क्रुद्धः परामृशत्. — After 21^{ab}, S (M_5 om. line 3) ins.:

162* येन क्रोधवशाञ्जघ्ने पर्वते गन्धमादने ।
दिव्यं सौगन्धिकं पुष्पं येनाजैषीत्स पाण्डवः ।
त्रिगर्तान्येन संग्रामे जित्वा त्रैगर्तमानयत् ।
इन्द्रायुधसमस्पर्शं वज्रहाटकभूषितम् ।

[(L. 1) M_5 तत्र (for जघ्ने). G_3 राक्षसान् (for पर्वते). — (L. 2) M_4 *sup. lin.* अनैषीत्. G परंतपः (for स पाण्डवः).]

— ^{c}) $B_{1.3}$ ज्यां तस्य; Dn_2 D_{11} ज्यां तां स; D_{12} ज्यांतं स; Cc ज्यापाशं (as in text). $B_{1.3}$ वीरो (for तस्य). — ^{d}) K °नोप्यवातरत्. — After 21, S ins.:

163* नकुलं पुनराहूय धर्मराजो युधिष्ठिरः ।
उवाच येन संग्रामे सर्वशत्रूञ्जिघांससि ।
सुराष्ट्राञ्जितवान्येन शार्ङ्गगाण्डीवसंनिभम् ।
सुवर्णविकृतं सारमिन्द्रायुधनिभं वरम् ।
तवानुरूपं सुदृढं चापमेतदलंकृतम् ।
तत्स्रंसयित्वा ज्यापाशं निधातुं धनुराहर ।
सहदेवं च संप्रेक्ष्य पुनर्धर्मसुतोऽब्रवीत् ।
कलिङ्गान्दाक्षिणात्यांश्च मागधांश्चारिमर्दन ।
येनैव शत्रून्समरे अधाक्षीररिमर्दन ।
तत्स्रंसयित्वा ज्यापाशं निधातुं धनुराहर ।

[$M_{2.4.5}$ transp. lines 1–6 and 7–10. G_1 om. lines 1–2. After line 2, M_1 reads line 6 (for the first time) and then 22^{ab}. — (L. 3) Om. in G_1 $M_{1.3}$ $M_{2.4}$ सुराष्ट्रं. M_2 °धन्विनं (for °संनिभम्). — After line 3, M_4 reads 22^{ab}. — (L. 4) Om. in G_1. $M_{2.3}$ °युधवरोपमं. — G_1 $M_{1.3}$ om. line 5. — (L. 6) Om. in G_1. T ज्यापाशान्. T_2 निधाय. M_1 धनुराहरत्; M_2 समुपाहर. — M_3 om. lines 7–10. — (L. 8) T_1 °मर्दनान्; $G_{1.3}$ M_2 °मर्दनः; $M_{1.4}$ (*sup. lin.*) अपि दिग्जये. — (L. 9) $G_{2.3}$ संग्रामे (for समरे). T_1 न्यधाक्षीः; T_2 व्यधा°; G_1 M_5 °क्षीद्; G_3 ह्यधा°; $M_{1.2}$ ॰ष्वधा°. — (L. 10) T ज्यापाशान्. T_2 निधाय.]

— M_1 cont.: M_2 ins. after line 6 of the same

तस्य मौर्वीमपाकर्षच्छूरः संक्रन्दनो युधि ॥ २२
दक्षिणां दक्षिणाचारो दिशं येनाजयत्प्रभुः ।
अपज्यमकरोद्वीरः सहदेवस्तदायुधम् ॥ २३
खड्गांश्च पीतान्दीर्घांश्च कलापांश्च महाधनान् ।
विपाठान्क्षुरधारांश्च धनुर्भिर्निदधुः सह ॥ २४
तामुपारुह्य नकुलो धनूंषि निदधत्स्वयम् ।
यानि तस्यावकाशानि दृढरूपाण्यमन्यत ॥ २५
यत्र चापश्यत स वै तिरो वर्षाणि वर्षति ।
तत्र तानि दृढैः पाशैः सुगाढं पर्यबन्धत ॥ २६
शरीरं च मृतस्यैकं समबध्नन्त पाण्डवाः ।
विवर्जयिष्यन्ति नरा दूरादेव शमीमिमाम् ।
आबद्धं शवमत्रेति गन्धमाघ्राय पूतिकम् ॥ २७ C. 4. 173 B. 4. 5. 32 K. 4. 7. 45

---

passage (cf. 22^{ab}):

164* अजयद्दक्षिणामाशां धनुषा येन पाण्डवः ।

Thereafter M1 repeats line 10 of 163*. — M2 ins. after 164*: M3, after 22^{ab}:

165* तदसज्यं धनुश्चक्रे नकुलो धनुरात्मनः ।
कलिङ्गान्दाक्षिणात्यांश्च येनाजयदरिंदमः ।

22 T G M5 om. 22–23; M2 om. 22. M1.4 read 22^{ab} after line 3 and 6 of 163*. — After 22^{ab}, N ins.:

166* माद्रीपुत्रो महाबाहुस्ताम्रास्यो मितभाषिता ।

[B (except B4) D3.7.9 ताम्राक्षो. B1.3.5 D6 [ऽ]मितविक्रमः; B2 Dn1 D1.9 °भाषितः; B4 D3 °भाषिणः; D7 मृदु°.]

— After 22^{ab}, M3 ins. 165* (cf. v. l. 21). — M1.3 om. 22^{cd}; M4 om. 22^{c}–23^{d}. — ^{c}) D1–3 तस्मान् (for तस्य). K2 समाकर्षत्; D7 अपावर्षत्; D8 अपाकार्षीत्; Ca as in text. — ^{d}) B1.3 संहननो; Ca.c.v संक्रन्दनो (as in text). B1.3 D4 युवा (for युधि). — After 22, N ins.:

167* कुले नास्ति समो रूपे यस्येति नकुलः स्मृतः ।

[D4 बले (for कुले), and यस्य (for रूपे). B3 कुले यस्यास्ति न समो; Cc.r as above (but in prose order). B3 रूपेण (for यस्येति). D1–3 नकुलस्तेन स (D3 सं-) स्मृतः. D4 reads रूपेण यशसा श्रिया for the posterior half, and cont.:

168* तेन तस्याभवन्नाम नकुलेति धनंजय ।]

23 T G M4.5 om. 23 (cf. v. l. 22). — ^{ab}) M1 अजयद्दक्षिणामाशां धनुषा येन पाण्डवः (=164^{f}). — After 23^{ab}, M1 ins. line 10 (with v. l. धनुराहरत्) of 163*; while M2.3 ins.:

169* यस्माल्लघुतरो नास्ति किंचिद्योद्धासि चर्मणि ।

M1 om. 23^{cd}. — ^{c}) M2.3 असज्यम् (for अपज्यम्). — ^{d}) B3 M2.3 स्वमायुधं; D2–4.8 तथायु°.

24 ^{a}) D1–4 सु- (for the first च). K1 पानान्; B1.2.5 Dn D6.11.12 दीप्तान्; D5 दीर्घान् (for पीतान्). B4 तीक्ष्णाग्रान्; Dn2 D8 दीर्घांश्च; D5 दीप्तां च. B3 (m as in text) खड्गान्दीर्घान्कलापांश्च; D7 खड्गान्दीर्घानदीप्तांश्च; D9 खड्गान्दीर्घान्प्रदीप्तांश्च; S दीर्घांश्च खड्गान् सुदृढान् (M3 विमलान्); Cc पीतान्दीप्तांश्च खड्गांश्च. Ca cites पीतान् and दीर्घान्, Cr अदीर्घांश्च, Crp (Dev.) पीनदीर्घांश्च. — ^{b}) B3 तोमरांश्च (for कला°); cf. Cs तोमरो हस्तक्षेप्यो बाणः. S निशितान् (M2 विमलान्; M3 विपुलान्) कनकत्सरून्. Ca.v cite कलापान् and महाधनान्. — ^{c}) S विविधान्क्षुरनाराचान्. — ^{d}) Dn2 D11.12 निदधे. S निस्त्रिंशां(M2.3 असज्ञां)श्च शरानपि. — After 24, Dn D9.11.12 ins.:

170* वैशंपायन उवाच ।
अथान्वशात्स नकुलं कुन्तीपुत्रो युधिष्ठिरः ।
आरुह्येमां शमीं वीर धनूंष्येतानि निक्षिप ।

[(L. 1) D9 Cn °न्वशासत् (for °न्वशात्स).]

— After 24, S ins. a passage given in App. I (No. 3).

☞ For st. 25–31, S subst. a passage which, besides containing some additional stanzas, shows other differences. The Southern passage (with its variants) is given separately, under v. l. 31.

25 For S cf. v. l. 31. — ^{b}) K B1–3 न्यदधत्; B4 Dn1 D4.7.9 निदधे; B5 D6.8.10 अवदधे; D1–3 अभ्यादधत्; D5 अवदधत्. — After 25^{ab}, D6 ins.:

171* गाण्डीवं चापरं तत्र चतुर्भिर्निदधे सह ।

— ^{c}) B1.3 तस्यावगाहानि; D10 °वशाखानि; Cn.s तस्यावकाशानि (sic); Cv as in text. — ^{d}) B2 Dn1 D12 दिव्य°; D1–4 दृश्य°; D7.9 दृष्ट° (for दृढ°).

26 For S cf. v. l. 31. — ^{a}) Dn2 D8.12 वा (for च). K2 D8 यत्र चा(D8 वा)पश्यति स वै; D4 यत्र पश्यत वर्षे वै; D7 यत्र चापश्यतः सर्वे; D9 यत्रामन्यन्न जलदो; D10 यत्र चापश्य तस्यैव.

27 For S cf. v. l. 31. — ^{a}) Dn1 च मृतं च; D1.3.8.9 मृतकस्य (for च मृतस्य). Ca.v as in text (Cv does not cite च). — ^{b}) D5.10 समबंधंत; D7.8 समबंधत; D9 पर्यबध्नात्स; Ca as in text. D1–4 समादाय न्यबंधत (D3 निबंधयत्; D4 निबंधत). 27^{cdef} = (var.)

C. 4. 173
B. 4. 5. 32
K. 4. 7. 59

अशीतिशतवर्षेयं माता न इति वादिनः ।
कुलधर्मोऽयमस्माकं पूर्वैराचरितोऽपि च ।
समासजाना वृक्षेऽस्मिन्निति वै व्याहरन्ति ते ॥ २८
आ गोपालाविपालेभ्य आचक्षाणाः परंतपाः ।
आजग्मुर्नगराभ्याशं पार्थाः शत्रुनिबर्हणाः ॥ २९
जयो जयन्तो विजयो जयत्सेनो जयद्बलः ।
इति गुह्यानि नामानि चक्रे तेषां युधिष्ठिरः ॥ ३०
ततो यथाप्रतिज्ञाभिः प्राविशन्नगरं महत् ।
अज्ञातचर्यां वत्स्यन्तो राष्ट्रे वर्षं त्रयोदशम् ॥ ३१

इति श्रीमहाभारते विराटपर्वणि पञ्चमोऽध्यायः ॥ ५ ॥

Mañj. 4. 27. — ^{c}) K विवर्जयंति च; D_{1-3} वर्जयिष्यंति हि. — ^{d}) D_{1-3} हि तां शमीं (for शमीमिमाम्). — ^{e}) K शावम् (for शवम्); cf. v. l. 1. 36. 24^{c}. — ^{f}) K_1 B_2 आदाय (for आघ्राय).

28 For S cf. v. l. 31. — ^{a}) ❀ Cc: अशीतिः शतं च वर्षाणि यस्याः। टीकान्तरं पाठान्तरे। ❀ — ^{b}) D_6 मातामहीति वा°. Ca cites माता and नः. — After 28^{ab}, K_2 $D_{4.5}$ ins.:

172* यया जाता स्म वृद्धा स्म इति वै व्याहरन्ति ते ।

(cf. 28^{f}). — ^{d}) B_2 Dn $D_{7.11.12}$ वा (for च). — ^{e}) B Dn D_{5-12} Cr (Dev.) समासज्याथ (for °सजाना). D_4 समासज्यायुधानीत्थं. — ^{f}) D_4 अन्योन्यं (for इति वै). K च (for ते). — After 28, D_4 ins.:

173* तस्माद्वृक्षादपाक्रम्य व्याहरन्तस्ततस्ततः ।

29 For S cf. v. l. 31. — ^{b}) Dn_2 $D_{11.12}$ आचक्षुस्ते; D_{1-3} आचक्षेयुः; $D_{4.9}$ आचक्षंतः; D_8 ह्याचक्षाणाः; Ca. r as in text. — ^{c}) A few MSS. °भ्यासं. — After 29, D_2(marg.)$._6$ ins. a short passage each, given in App. I (No. 4 A & B), a variant version of the so-called Durgāstava.

30 For S cf. v. l. 31. — ^{c}) B_2 गुप्ता°; B_4 नामा° (for गुह्या°). $D_{4.5}$ transp. गुह्या° and नामा°. B_4 गुप्ता° (for नामा°). — ^{d}) K $B_{2.4}$ D_{4-6} transp. चक्रे and तेषां. — After 30, $D_{4.10}$ ins. an addl. adhy. given in App. I (No. 4C), which D_5 ins. after adhy. 5, a variant version of the so-called Durgāstava.

31 For S see below. D_4 om. 31. — ^{a}) $B_{1.3.4}$ $D_{9.10}$ °ज्ञातं; D_6 °ज्ञाते. — ^{b}) D_{1-3} transp. प्राविशन् and नगरं. — After 31, D_3 ins.:

174* रामाभिरामसुरपादपतुल्यगन्धैः
पुष्पैरलंकृतधरं सुनिविष्टवप्रम् ।
प्राकारतोरणगृहैरिव मन्दराद्रि-
* * * कूटमथ ते ददृशुः पुरं[हि] तत् ।

☞ For 25–31, S subst.:

175*
(29) आगोपालाविपालेभ्यः कर्षकेभ्यः परंतपाः ।
आजग्मुर्नगराभ्याशं श्रावयन्तः पुनः पुनः ।
(28^{ab}) अशीतिशतवर्षेयं मातास्माकमिहेति च ।
बहुकालपरीणामान्मृत्योस्तु वशमेयुषी ।
(28^{c}) न चाग्निसंस्कारमियं प्रापिता कुलधर्मतः ।
यः समासाद्यते कश्चित्तस्मिन्देशे यदृच्छया ।
(28^{c}) तमेवमूचुर्धर्मज्ञाः कुलधर्मो न ईदृशः ।
अथाब्रवीद्धर्मराजः सहदेवं परंतपः ।
इदं गोमृगमभ्याशे गतसत्त्वमचेतनम् ।
एतदुत्कृत्य वै वीर धनूंषि परिवेष्टय ।
एवमुक्तो महाबाहुः सहदेवो यथोक्तवत् ।
(25^{ab}) शमीमारुह्य त्वरितो धनूंषि परिवेष्टयत् ।
शीतवातातपभयाद्वर्षत्राणाय दुर्जयः ।
तानि वीरो यदाजानान्निराबाधानि सर्वशः ।
पुनः पुनः सुसंवेष्ट्य कृत्वा सुकृतकारिणः ।
अथापरमदूरस्थमुञ्छवृत्तिकलेवरम् ।
प्रायोपवेशनाच्छुष्कं स्नायुचर्मास्थिसंवृतम् ।
तच्चानीय धनुर्मध्ये विनिबध्य च पाण्डवाः ।
उपायकुशलाः सर्वे प्रहसन्तः समब्रुवन् ।
(27^{f}) अस्य गन्धस्य दौर्गन्ध्यान्मनुष्या वनचारिणः ।
(27^{cde}) दूरात्परिहरिष्यन्ति सशवेयं शमी इति ।
अथाब्रवीन्महाराजो धर्मात्मा स युधिष्ठिरः ।
रज्जुभिः सुदृढं प्राज्ञ विनिबध्नीहि पाण्डव ।
(25^{cd}) यानि चात्र विशालानि रूढमूलानि मन्यसे ।
तेषामुपरि बध्नीहि इदं विप्रकलेवरम् ।
विश्रावयन्तस्ते हृष्टा दिशः सर्वा व्यनादयन् ।
स्वर्गतेयमिहास्माकं जननी शोकविह्वला ।
वने विचरमाणानां लुब्धानां वनचारिणाम् ।
(28^{cd}) कुलधर्मोऽयमस्माकं पूर्वैराचरितः पुरा ।
एवं ते सुकृतं कृत्वा समन्तादवघुष्य च ।
भीमसेनोऽर्जुनश्चैव माद्रीपुत्रावुभावपि ।
युधिष्ठिरश्च कृष्णा च राजपुत्री सुमध्यमा ।
(31^{ab}) ततो यथासमाज्ञप्तं नगरं प्राविशंस्तदा ।

६

वैशंपायन उवाच।
ततो विराटं प्रथमं युधिष्ठिरो
राजा सभायामुपविष्टमाव्रजत्।
वैडूर्यरूपान्प्रतिमुच्य काञ्चना-
नक्षान्स कक्षे परिगृह्य वाससा ॥ १
नराधिपो राष्ट्रपतिं यशस्विनं
महायशाः कौरववंशवर्धनः।
महानुभावो नरराजसत्कृतो
दुरासदस्तीक्ष्णविषो यथोरगः ॥ २
बलेन रूपेण नरर्षभो महा- C. 4. 216 B. 4. 7. 3

मत्स्यराज्ञो विराटस्य समीपे वस्तुमञ्जसा।
(31^{cd}) अज्ञातचर्यां चरितुं वर्षं राष्ट्रे त्रयोदशम्।
(30^{cd}) अथ छन्नानि नामानि चकारैषां युधिष्ठिरः।
(30^{ab}) जयो जयेशो विजयो जयत्सेनो जयद्बलः।
आपत्सु नामभिस्त्वेतैः समाह्वामः परस्परम्।

[M om. the posterior half of line 1 and the prior half of line 2. — (L. 1) $G_{2.3}$ परंतप. — (L. 3) T G °मिहान्तिके. — (L. 4) T_1 $M_{4.5}$ इह; M_{1-3} मृता (for बहु-). — (L. 5) $M_{4.5}$ प्राप्ता हि (for प्रापिता). — (L. 6) M_1 यस्मिन्नासाद्यते; $M_{2.5}$ योस्मिन्नासा°; M_3 न समासा°. G_1 M (except M_4) पुमान् (for तस्मिन्). — (L. 7) $M_{2.5}$ आहुः; M_3 आह (for ऊचुः). M_3 धर्मज्ञः. G_1 $M_{2.4}$ यम् (for न). M_3 °धर्ममनुस्मरन्. — (L. 10) G_2 धीर; M_5 चर्म (for वीर). — (L. 11) M_4 राज्ञो वचन-माज्ञाय (for the prior half). — (L. 12) M_2 विधिवद्; M_3 महतीं (for त्वरितो). — (L. 13) T_2 G_1 दुर्जयात्. — (L. 14) T_2 राजा; G_1 राजन्; G_2 M_2 जानन्. — (L. 15) T_1 सुकृतमारवं; T_2 G_1 °माचरत्; G_2 °मावरं; G_3 °मंबरं. — (L. 17) T_1 M_1 स्नायुमज्जास्थि°; T_2 G °संयुतं. — (L. 18) T_1 G_1 निर्बबंधुश्च; T_2 विनिबंधुश्च; $G_{2.3}$ विनिर्बध्य. — (L. 19) T_1 प्रहसंश्च. T_1 इदमब्रुवन्; G_1 च दुद्रुवन्; $M_{1.5}$ ततोब्रुवन्; M_2 तमब्रुवन्. — (L. 20) M_5 देह° (for गन्ध°). T_1 शवस्यास्य च दौ°; G_2 अस्यागमस्य दौ°. — (L. 21) G_1 M_{2-4} ससत्वेयं. T_1 शमीमिति; T_2 G शमीति ह (G_1 हि). — (L. 22) $G_{2.3}$ M_2 महातेजाः; M_4 °राज. T_2 G_2 (by transp.) स धर्मात्मा; $G_{1.3}$ धर्म-राजो; $M_{1.5}$ सहदेवं. — (L. 23) G सुकृतं (for सुदृढं). M_1 °भिः सहदेवाशु. G विनिर्बध्नीहि; M_5 °बध्यस्व. — (L. 25) $M_{1.4.5}$ बध्यस्व; M_2 बद्धस्य (for बध्नीहि). — After line 25, M_5 ins.:

176* तथा तत्सर्वमकरोत्सहदेवो यथोक्तवान्।

— (L. 26) T_2 सर्वांस्ते; G_1 सर्वास्ते; $G_{2.3}$ ते सर्वे (for ते हृष्टा). — (L. 28) G_3 M_{2-5} बुद्धानां; M_1 सिद्धा° (for लुब्धा°). — (L. 29) $G_{2.3}$ $M_{2.4}$ आचरितं. — (L. 30) T_1 समयं (for सुकृतं). — $M_{1.3.4}$ transp. lines 31 and 32. — (L. 31) M_5 माद्रीपुत्रौ च तावुभौ. — (L. 34) T_1 G_1 समीपं. — G_1 $M_{1.3-5}$ om. line 38.]

☞ After adhy. 5, Dn $D_{3.5-7.9.11.12}$ T_2 ins. an additional adhy. given in App. I (No. 4 C, D, E, F, G), one of the versions of what is popularly known as the Durgāstava; cf. v. l. 29, 30. All reference to Durgā is missing in K B $D_{1.3}$ and in S (except the composite MS. T_2).

Colophon om. in $D_{4.10}$ T_2. — *Adhy. name:* $B_{1.3}$ नगरगमनं; B_2 अस्त्रनिधानं; B_4 अस्त्रन्यसनं; B_5 $D_{5.6}$ G_3 $M_{1.2}$ आयुधन्यासः; Dn $D_{9.11.12}$ पुरप्रवेशः; D_{1-3} आयुध-निक्षेपः; D_7 शस्त्रन्यासः; G_1 नगरप्रवेशः. — *Adhy. no.* (figures, words or both): K_2 B_4 $D_{5.6.9}$ 5; T_1 G M 7. — *S'loka no.:* D_3 37; G_3 67.

6

1 After वैशं°, S ins. a passage given in App. I (No. 5). — S transp. 1^{ab} and 1^{cd}. — ^{b}) S ददर्श दूरात्सुसमृद्धतेजसं. — ^{c}) A few MSS. वैदूर्य°. D_{1-3} °नद्धान्; D_9 °बिंदून् (for °रूपान्). K $D_{1.2}$ प्रवि°; B D_{4-7} °गृह्य; Cs प्रतिमुच्य (as in text). S निबध्य (T G_1 °द्ध-) वैडूर्यचितान्सकांचनान् (M_1 वैडूर्यचित्रान्सुगुणान्मृगासितान्). — ^{d}) S (except M_1) नृपस्तदाक्षान् (for अक्षान्स कक्षे). B_3 $D_{5.7}$ Ca. cp. rp परिरभ्य; D_4 प्रतीगृह्य; S °वेष्ट्य; Cc. r. s as in text. K $D_{1.10}$ वाससि; $D_{2.4.8}$ °सी; Cc. r. s as in text.

☞ For st. 2–15, S subst. a passage which, besides containing some additional stanzas, shows other differences. The Southern passage (with its variants) is given separately under v. l. 15.

3 For S cf. v. l. 15. — ^{a}) $D_{1.2.4.8}$ परेण (for बलेन). $B_{1.3}$ (m as in text) तथैव तेजसा; D_4 यथा पुरंदरः (for नरर्षभो महान्). — ^{b}) B_4 तथार्चि°; B_5 Dn

C. 4. 216 B. 4. 7. 3 नथार्चिरूपेण यथामरस्तथा ।
महाभ्रजालैरिव संवृतो रवि-
र्यथानलो भस्मवृतश्च वीर्यवान् ॥ ३
तमापतन्तं प्रसमीक्ष्य पाण्डवं
विराटराडिन्दुमिवाभ्रसंवृतम् ।
मन्त्रिद्विजान्सूतमुखान्विशस्तथा
ये चापि केचित्परिषत्समासते ।
पप्रच्छ कोऽयं प्रथमं समेयिवा-
ननेन योऽयं प्रसमीक्षते सभाम् ॥ ४
न तु द्विजोऽयं भविता नरोत्तमः
पतिः पृथिव्या इति मे मनोगतम् ।
न चास्य दासो न रथो न कुण्डले
समीपतो भ्राजति चायमिन्द्रवत् ॥ ५
शरीरलिङ्गैरुपसूचितो ह्ययं
मूर्धाभिषिक्तोऽयमितीव मानसम् ।
समीपमायाति च मे गतव्यथो
यथा गजस्तामरसीं मदोत्कटः ॥ ६
वितर्कयन्तं तु नरर्षभस्तदा
युधिष्ठिरोऽभ्येत्य विराटमब्रवीत् ।
सम्राड्विजानात्विह जीवितार्थिनं
विनष्टसर्वस्वमुपागतं द्विजम् ॥ ७
इहाहमिच्छामि तवानघान्तिके

D11.12 अपूर्व°; D1–3 गंधर्व°; D6.7 Cr अथ स्व° (D6m आर्चिस्व°); D8 मनुष्य°; D10 नरस्व°; Cc.rp (Catur.) अथा(Cc om. अथ)र्चिरूपेण (as in text). K D9 अंथं(D9 °पू)र्वरूपेण यथा पुरंदरः; B1.3 निगूढभावो ज्वलनो यथा प्रभुः; B2.3m अथ स्वरूपेण महारथ(B3m यथामर)स्तथा; D4 अथर्वरूपेण नरर्षभस्तथा.

4 For S cf. v. l. 15. — a) B2 दुरितं नृपोत्तमं; B3 (m as in text) सहसा निरीक्ष्य; D4 त्वरितं नरोत्तमं (for प्रसमीक्ष्य पाण्डवं). Cc cites प्रसमीक्ष्य. — b) D4 नृपो विराटोभ्रगतं यथा रविं. — After 4^{ab}, N ins.:

177* समागतं पूर्णशशिप्रभाननं
महानुभावं नचिरेण दृष्टवान् ।

[(L. 1) D1.3–9 सभागतं (D6.7 °तः). — (L. 2) D4 om. line 2. K B3.4 D1–3.5–8.10 सहा(D5 °भा)नुचारैर-(K D6 °नै)श्चि°; D9 सभासदैर्नातिचि°.]
— c) K विराटराट्; B2.3 (m as in text) मत्तद्विजान्; B4 D1–3.7–10 स तु (D1–3 च) द्विजान्; D4 समुद्विजन् (for मन्त्रि°). D9 मंत्रि° (for सूत°). K द्विजांस्; Ca.c विशस् (as in text). D1–3 transp. विशः and तथा. K D4 तदा; Ca तथा (as in text). — d) D2 ये चानुगास्तं; D9 येन्येपि केचित्; Ca as in text. B Dn D2.5–12 Ca.c परितः (B3 पुरतः; Dn1 परतः); D4 पुरुषाः (for परिषत्). D4 समागताः; Ca समासते (as in text). D1.3 ये चानुगास्तत्परिषत्सु ते स्थिताः. — e) K D1.3.8 वः (for ऽयं). Cf. Cv अयं वः युष्माकं कः संबन्धीयः. K D5.6.10 Ca समीयिवान्; Cc.v as in text. — f) B Dn D5.7.9.11.12 नृपोपमोयं (D9 यः); D1–3.8 नरो हि येषां (D2 योयं; D3 यो वै); D4 मानेन योयं; D6 रूपोपमोयं; D10 इहागतोयं (for अनेन योऽयं). B1.2.5 Dn D3.10–12 समवेक्षते (for प्रस°).

5 For S cf. v. l. 15. — K1 om. 5^{c}–6^{b}. — a) K2 दासी; B1.2.3(m as in text).4.5 D5–7.9 वाजी; D1–4 दासा (for दासो). B Dn2 D5–7.9.11.12 कुंजरः (for कुण्डले). — d) D4 सभागतो (for समी°).

6 For S cf. v. l. 15. K1 om. 6^{ab} (cf. v. l. 5). — b) B1 °षिक्त इति मे मनोगतं; B3.4 Dn D5–9.11.12 °षिक्तस्त्वि(Dn D11.12 °क्त इ-; D8 °क्तो ह्य)ति मेत्र मानसं; D1–3 °षिक्तो मम चेतसि स्थितं; D4 मूर्धावसिक्तः प्रतिभाति मे हृदि. — c) D1–3 °व्यथं. — d) D1.3 महीं; D2.6 महान्; Ca गजस् (as in text). Cap तामरसी; Cr.s as in text. D1–3 महागजः; Ca मदोत्कटः (as in text).

7 For S cf. v. l. 15. — a) K2 B5 D5 च; D8.10 स (for तु). K2 B5 D5–7.9 °र्षभं. B1.2 Dn2 D7.9.11.12 तथा; B3 यथा (for तदा). D1–3 वितर्कयामास च तं नरर्षभः. — Before 7^{cd}, B3.4 D5 ins. युधिष्ठिर उ°. — c) Dn D11.12 विजानीहि हि; D1.3 विजानामिह. B1.4 Dn2 D3–9 जीवनार्थिनं. — After 7, D7.9 ins.:

178* विद्धि प्रभो मत्स्यपते कुलोत्तमं
सेवार्थिनं सेवकमानवर्धनम् ।

8 For S cf. v. l. 15. — a) K D10 °कं (for °के). — b) D1–3 तथा(D2 °वा)भिभो. — d) D4 Cv प्रतिसंग्रहेण; Ca.c.vp as in text. Cr cites only गृहाण. D8 प्रहृष्टरूपो जगृहे तथागतं. — After 8, N (except K1 D1) ins.:

179* तं राजसिंहं प्रतिगृह्य राजा
प्रीतात्मना चैवमिदं बभाषे ।

वस्तुं यथा कामचरस्तथा विभो ।
तमब्रवीत्स्वागतमित्यनन्तरं
राजा प्रहृष्टः प्रतिसंगृहाण च ॥ ८
कामेन ताताभिवदाम्यहं त्वां
कस्यासि राज्ञो विषयादिहागतः ।
गोत्रं च नामापि च शंस तत्त्वतः
किं चापि शिल्पं तव विद्यते कृतम् ॥ ९

युधिष्ठिर उवाच ।

युधिष्ठिरस्यासमहं पुरा सखा
वैयाघ्रपद्यः पुनरस्मि ब्राह्मणः ।
अक्षान्प्रवप्तुं कुशलोऽस्मि देविता
कङ्केति नाम्नास्मि विराट विश्रुतः ॥ १०

विराट उवाच ।

ददामि ते हन्त वरं यमिच्छसि
प्रशाधि मत्स्यान्वशगो ह्यहं तव ।
प्रिया हि धूर्ता मम देविनः सदा
भवांश्च देवोपम राज्यमर्हति ॥ ११

युधिष्ठिर उवाच ।

आप्तो विवादः परमो विशां पते
न विद्यते किंचन मत्स्य हीनतः ।
न मे जितः कश्चन धारयेद्धनं
वरो ममैषोऽस्तु तव प्रसादतः ॥ १२

विराट उवाच ।

हन्यामवध्यं यदि तेऽप्रियं चरे-
त्प्रव्राजयेयं विषयाद्द्विजांस्तथा ।
शृण्वन्तु मे जानपदाः समागताः
कङ्को यथाहं विषये प्रभुस्तथा ॥ १३
समानयानो भवितासि मे सखा
प्रभूतवस्त्रो बहुपानभोजनः ।
पश्येस्त्वमन्तश्च बहिश्च सर्वदा C. 4. 228 B. 4. 7. 16

[(L. 1) K_2 परिगृह्य; B_3 D_8 प्रसमीक्ष्य. — (L. 2) B Dn $D_{2.9-12}$ प्रीत्यात्मना; D_8 प्रीतात्मवान्. $B_{3.4}$ $D_{4.5}$ चैनम् (for चैवम्).]

9 For S cf. v. l. 15. Before 9, B_3 $D_{2.4.7-10}$ read विराट उ°. — ^{b}) = 4. 9. 7^{a}. — ^{c}) $D_{4.8}$ नाम्ना सह (for नामापि च). — ^{d}) = 4. 9. 7^{b}.

10 For S cf. v. l. 15. K_1 श्री * * णः; K_2 ब्राह्मण उ°; D_8 कंक उ° (for युधि° उ°). — ^{a}) Dn_2 $D_{1-3.9}$ transp. पुरा and सखा. D_4 °रस्यास्मि सखा प्रतीतो; Cnp °रः स्याहमहं (sic) सखा. — ^{b}) B_4 प्रवरोस्मि; D_4 पुनरेव (for पुनरस्मि). $B_{1.3.4}$ वै द्विजः; B_5 Dn_1 D_4 Cn.r.s विप्रः; D_5 चैव ह; $D_{7.8}$ गोत्रतः; Cnp (cf. also Csp) ब्राह्मणः (as in text). — ^{c}) K $D_{1.7}$ प्रवक्तुं; B Dn $D_{3-6.8-12}$ Cc प्रयोक्तुं; Cs प्रकर्तुं; only D_2 exactly as in text! K वेदिता; B_1 देविनां; $D_{2-4.8}$ देवने. — ^{d}) K नामा°; Cv नाम्ना° (as in text).

11 For S cf. v. l. 15. — ^{a}) B_4 ददानि. K D_7 अहं तु; Cv हंत (as in text). K प्रतीच्छसि; B_4 यदि°; D_6 यथे°. — ^{b}) $D_{1-3.10}$ अस्मि (for हि). D_{1-3} ते द्विज (for अहं तव). — ^{c}) B_1 Dn_1 D_{12} च (for हि). — ^{d}) $D_{1.4}$ °र्हसि.

12 For S cf. v. l. 15. — ^{a}) K गुरोर्; $B_{1-3.5}$ Dn_2 $D_{6.7}$ m. $_{8.11.12}$ Cc.n.s प्राप्तो; Cr.v आप्तो (as in text). N (except K $D_{6.10}$) Cv प्रथमं; Cc प्रथमः; Cr.cp परमः (as in text). Cap cites आप्तो विवादः परमः and प्राप्नोतु वादं प्रथमं विशां पते, Crp आप्नोतु वादं प्रथमं (and प्रथमः). — ^{b}) B (except B_4) Ca कश्चन; Dn $D_{11.12}$ Cs कं च न; D_6 किं न च; Cr किंचिन्; Cv.ap as in text. Ca cites (in prose order): मत्स्य विशां पते हीनतः कश्चन न विद्यते मम विवादः [इति] प्रथमं प्राप्तः [वरः]. — ^{c}) $D_{2.8}$ Cv जितं; Ca.c.r.s as in text. K दापयेद्वरं; Ca.c.r.s.v धारयेद्धनं (Cr om. धनं) (as in text). — ^{d}) N (except K $B_{2.4}$ $D_{3.10}$) Cv प्रसादजः.

13 For S cf. v. l. 15. — ^{a}) B_1 (m as in text). $_{3.5}$ Dn $D_{5.6.10-12}$ अवश्यं (for अवध्यं). — ^{b}) D_{1-4} विवास° (for प्रव्राज°). D_4 द्विजर्षभान् (for द्विजांस्तथा). — B_2 om. 13^{cd}. — ^{c}) K पौरजनाः (for जान°). D_4 समेताः (for समा°). — ^{d}) D_8 transp. प्रभुः and तथा.

14 For S cf. v. l. 15. — ^{a}) K संपन्नजातो; B_{2-4} D_{1-10} Ca.r.v °जातो; B_5 °यातो. D_{1-3} अस्मि भवांश्च; Ca भवितासि (as in text). — ^{b}) K बहुमान°; D_{10} °भोजनं. — ^{c}) $D_{7.9}$ संपश्य मे (for पश्येस्त्वम्). Cv संमदा (for सर्वदा). — ^{d}) B_3 D_5 तव; D_{1-3} मया (for च ते). B_3 अनावृतं; Ca.c अपा° (as in text). D_{1-3} यतः (for मया).

C. 4. 228
B. 4. 7. 16

कृतं च ते द्वारमपावृतं मया ॥ १४
ये त्वानुवादेयुरवृत्तिकर्शिता
ब्रूयाश्च तेषां वचनेन मे सदा ।
दास्यामि सर्वं तदहं न संशयो

---

15 a) K ये बांधवा वेयुरवृत्तिकर्षिता; B_4 D_{10} ये त्वानुयाचेयुर°; Dn $D_{11.12}$ ये त्वानुवादैः पुर°; $D_{1.8}$ ये त्वानुसंधेयुर°; $D_{2.4.5}$ ये त्वानुबाधेयुर°; $D_{6.7.9}$ Cr ये त्वां च याचेयुर°; D_8 ये त्वानुधावेयुर°. Crp (Catur.) cites त्वानुवादेयुः (as in text). A few MSS. °कर्षिताः. — b) B Dn $D_{6.7.9.11.12}$ मां सदा; D_{10} सर्वदा. — c) D_{1-3} सततं (for तदहं). — d) Dn_2 $D_{2.7.11}$ विद्यते; D_4 तिष्ठति. $D_{1.3}$ न विद्यते ते मम संनिधौ भयं.

☞ For 2–15, S subst.:

180* अनन्ततेजोज्वलितं यथानलं
(2^d) दुरासदं तीक्ष्णविषं यथोरगम् ।
सभागतं प्राञ्जलिभिर्जनैर्वृतं
विचित्रनानायुधशस्त्रपाणिभिः ।
उपायनौघैः प्रविशद्भिराचितं
द्विजैश्च शीक्षाक्षरमन्त्रधारिभिः ।
गजैरुदीर्णं तुरगैश्च संकुलं
मृगद्विजैः कुब्जगणैश्च संवृतम् ।
सितोच्छ्रितोष्णीषनिरुद्धमूर्धजं
विचित्रवैडूर्यविकारकुण्डलम् ।
विराटमाराच्च युधिष्ठिरस्तदा
बृहस्पतिः शक्रमिव त्रिविष्टपे ।
(4^a) तमाव्रजन्तं प्रसमीक्ष्य पाण्डवं
(4^b) विराटराजो मुदितेन चक्षुषा ।
(4^c) पप्रच्छ चैनं स नराधिपो मुहु-
(4^c) र्द्विजांश्च ये चास्य सभासदस्तदा ।
(4^e) को वा विजानाति पुरास्य दर्शनं
(4^f) युवा सभां योऽयमुपैति मामिकाम् ।
(3^a) रूपेण सारेण विदारयन्महीं
(3^b) श्रिया ह्ययं वैश्रवणो द्विजो यथा ।
मृगेन्द्रराड्वारणयूथपोपमः
प्रभात्ययं काञ्चनपर्वतो यथा ।
विरोचते पावकसूर्यसंनिभः
सचन्द्रनक्षत्र इवांशुमान्ग्रहः ।
(5^c) न दृश्यतेऽस्यानुचरो न कुञ्जरो
न चोष्णरश्म्यावरणं समुच्छ्रितम् ।
(5^e) न कुण्डले नाङ्गदमस्य न स्रजो
विचित्रिताङ्गश्च रथश्चतुर्युजः ।
(5^{ab}) क्षात्रं च रूपं हि बिभर्त्ययं भृशं
गजेन्द्रशार्दूलमहर्षभोपमः ।
अभ्यागतोऽस्माननलंकृतोऽपि स-
न्विरोचते भानुरिवाचिरोदितः ।
विभात्ययं क्षत्रिय एव सर्वथा
विराट इत्येवमुवाच तं प्रति ।
ससागरान्तामयमद्य मेदिनीं
प्रशासितुं चार्हति वासवोपमः ।
नाक्षत्रियो नूनमयं भविष्यति
(6^b) मूर्धाभिषिक्तः प्रतिभाति मां प्रति ।
तुल्यं हि रूपं प्रतिदृश्यतेऽस्य
व्याघ्रस्य सिंहस्य महर्षभस्य ।
यदेष कामं परिमार्गते द्विज-
स्तदस्य सर्वं क्रियतामसंशयम् ।
प्रियं च मे दर्शनमीदृशे जने
द्विजेषु मुख्येषु तथातिथिष्वपि ।
धनेषु रत्नेष्वथ गोषु वेश्मसु
प्रकामतो मे विचरत्ववारितः ।
एवं ब्रुवाणस्तमनन्ततेजसं
विराजमानं सहसोत्थितो नृपः ।
अनेन रूपेण समीपमागतं
त्रिदण्डकुण्ड्यङ्कुशशिक्यधारिणम् ।
समुत्थिता सा च सभा सपार्थिवा
सविप्रराजन्यविशा सशूद्रका ।
सभागतं प्रेक्ष्य तपन्तमर्चिषा
विनिःसृत राहुमुखाद्यथा रविम् ।
स तेन पूर्वं जयतां भवानिति
द्विजातिनोक्तोऽभिमुखः कृताञ्जलिः ।
जयं जयार्हेण समेत्य वर्धितो
विराटराजो ह्यभिवादयच्च तम् ।
(8^c) तमब्रवीत्प्राञ्जलिरेव पार्थिवो
(8^d) विराटराजो मधुराक्षरं वचः ।
प्राप्तः कुतस्त्वं भगवन्किमिच्छसि
11 ^{a}) S न च विद्म गतिं तेषां. — ^{b}) K_{2} $B_{1-3.5}$ Dn $D_{5.6.10-12}$ सु-; $D_{7.9}$ स्म (for स्युर्). B_{4} पार्थाः शत्रुनिबर्हणाः; D_{8} °र्थास्तेमित°; S पांडवानामरिंदम. — ^{d}) D_{4} पथि (for the second तथा). S आश्रमेषु वनेषु च.

12 M_{3} om. 12^{ab}. — ^{a}) K transp. -कूटेषु and तुङ्गेषु. $D_{4.5}$ M_{1} दुर्गेषु; D_{7} (m as in text).$_{8-10}$ G_{1} शृंगेषु; T_{2} G_{2} मार्गेषु (for तुङ्गेषु). — K_{1} D_{4} om. 12^{cd}.

C. 4. 872
B. 4. 25. 12
K. 4. 29. 16

जनाकीर्णेषु देशेषु खर्वटेषु पुरेषु च ॥ १२
नरेन्द्र बहुशोऽन्विष्टा नैव विद्मश्च पाण्डवान् ।
अत्यन्तभावं नष्टास्ते भद्रं तुभ्यं नरर्षभ ॥ १३
वर्त्मान्यन्विष्यमाणास्तु रथानां रथसत्तम ।
कंचित्कालं मनुष्येन्द्र सूतानामनुगा वयम् ॥ १४
मृगयित्वा यथान्यायं विदितार्थाः स्म तत्त्वतः ।
प्राप्ता द्वारवतीं सूता ऋते पार्थैः परंतप ॥ १५
न तत्र पाण्डवा राजन्नापि कृष्णा पतिव्रता ।
सर्वथा विप्रनष्टास्ते नमस्ते भरतर्षभ ॥ १६
न हि विद्मो गतिं तेषां वासं वापि महात्मनाम् ।
पाण्डवानां प्रवृत्तिं वा विद्मः कर्मापि वा कृतम् ।
स नः शाधि मनुष्येन्द्र अत ऊर्ध्वं विशां पते ॥ १७

— ^{c}) D1.3.10 नाना° ; D5.6 जला° (for जना°). K2 D8 S सर्वेषु; D10 सत्वेषु (for देशेषु). — ^{d}) K2 D8 पर्वतेषु; B1.3.5 D6 Cr.v कर्व°; B2 कर्क°; B4 संक°; Dn D10–12 कटकेषु; D1.3 कंटके°; D2 ग्रामेषु च; S चत्वरेषु (for खर्वटेषु). Cc explains खर्वटं, Cs cites खर्वटः, Ca has कर्वटे कर्वटे. B1 Dn2 D7–9.11.12 परेषु (for पुरेषु).

13 G1 (hapl.) om. 13 (with lines 1–3 of 500*). — ^{a}) D1–4 राजेंद्र. S (G1 om.) सहसा (for बहुशो). K2 दृष्ट्वा; T G2 M1–3.5 नष्टा; G3 M4 नष्टान् (for ऽन्विष्टा). — ^{b}) K D4 T G2.3 M1.2.5 विद्म. D8 न विद्मः क्व नु ते गताः. — ^{c}) K D4 अत्यंत(D4 °ता)भावनष्टास्ते; B1.4.5 Dn D10–12 अत्यंतं वा विनष्टास्ते (B4 प्रणष्टास्ते; D10 विनष्टेषु); S (G1 om.) अत्यंतनाशनष्टास्ते (T2 °तमेव नष्टास्ते); Ca (on st. 16?) as in text. ❀ Crp (Dev.): अतिशयेनान्तभावो मरणं यत्र नाशे तथा नष्टाः । ❀ — ^{d}) D8 T G2 नराधिप (for नरर्षभ). — S ins. after 13 (G1 om. lines 1–3):

500* गिरीणां कूटकुञ्जेषु कन्दरान्तरसानुषु ।
नदीप्रस्रवणेष्वेव ह्रदेषु च सरःसु च ।
गह्वरेषु च दुर्गेषु ग्रामेषूपवनेषु च ।
दुर्विज्ञेया गतिस्तेषां मृग्यन्तेऽस्माभिरेव हि ।
गजव्यालसमीपेषु सिंहान्ते शरभान्तरे ।

[(L. 2) T1 M2 नदीकूलेषु सर्वेषु (for the prior half). — (L. 3) M (except M1) सर्वेषु (for दुर्गेषु).]

14 ^{a}) K1 (corrupt) धामांत्यनिह्यमानास्तु; K2 धर्मानि निछमानास्तु (sic); B1 Dn D1.2.10–12 वर्त्मन्यन्वे(D1 °न्वि)ष्यमाणा वै (D1.2 °णास्तु; D10 °णाश्च); B2–5 D5.6 वार्तामन्विष्य(B3 D5 °न्वेष-; B5 °न्विष)माणाश्च; D4.7–9 वर्त्मान्यन्वेष(D4 °ष्य)माणाश्च (D4.8 °स्तु); S वर्त्म(G1 M3 पद्मा-; M5 वर्त्मा)न्यन्विच्छमानास्तु. — ^{b}) B1 Dn D11.12 रथिनां; B4 पार्थानां. B (except B4) Dn D4.8.11.12 रथिसत्तम; D1–3 रथसत्तमाः. — After 14^{ab}, B1 Dn D11.12 ins.:

501* न हि विद्मो गतिं तेषां वासं हि नरसत्तम ।

— B3 om. 14^{c}–16^{d}. — ^{c}) B2.4.5 D (except D1.5.6) S (except M1.4.5) किंचित् (for कंचित्). — ^{d}) Ca मुख्यानां (for सूतानां). S सूताननुगता वयं.

15 B3 om. 15 (cf. v. l. 14). — ^{b}) D1.3.8 S च (for स्म). — ^{c}) T G1.2 पार्थान्; G3 प्राप्तान् (for सूता). — ^{d}) B (B3 om.) D (except D1.3) विना (for ऋते). D1–3 M पार्थान्; T G सूताः (for पार्थैः). — After 15, T G2 ins.:

502* सन्तीतरे जनपदा ये पार्थान्वेषिभिर्नृप ।
प्रविचितास्ते ह्यस्माभिः पृथिवीमण्डलेऽखिले ।

16 B3 om. 16 (cf. v. l. 14); B2 om. 16^{a}–17^{d}. — ^{a}) B1 Dn D6.10–12 न तत्र कृष्णा राजेंद्र. — ^{b}) K B5 च (for अपि). B1 Dn D6.10–12 पांडवाश्च (D6 °वा वा); D5.7.9 कृष्णा चापि (for नापि कृष्णा). B1 Dn2 D8.10–12 महाव्रताः; Dn1 D6 महारथाः; D1–3 G3 M महाव्रता; G1 परंतप (for पतिव्रता). — After 16^{ab}, S ins.:

503* नरदेव यथोद्दिष्टं नैव विद्म च पाण्डवान् ।
निर्वृतो भव नष्टास्ते स्वस्थो भव परंतप ।

[(L. 1) T1 G च; T2 हि (for एव). M3.4 विद्मः. G1.3 अत्र (for चे).]

— ^{c}) S एव (for वि-). — ^{d}) B4 दृप्यस्व; D6 (corrupt) भद्रं तुभ्यं; D7.9 भ्रष्टाश्च; G1 न भीस्ते (for नमस्ते). B1 D7.9 G3 पुरुषर्षभ; D2 अस्तु नरर्षभ; G1 पुरुषोत्तम.

17 B2 om. 17^{abcd} (cf. v. l. 16). For S see below. — ^{b}) K1 D4.6.8.9 च (for वा). D1–4 कथंचन (for महा°). — ^{c}) K D9 न; B1.5 Dn D5.8.10–12 च (for वा). — ^{d}) K विद्म. D6 विद्मः कर्माणि वा तथा. — For 17^{abcd}, S subst.:

504* सर्वा च पृथिवी कृत्स्ना सशैलवनकानना ।
सराष्ट्रनगरग्रामा पत्तनैश्च समन्विता ।
अन्वेषिता च तत्सर्वं न च पश्याम पाण्डवान् ।

[(L. 1) T राजन् (for कृत्स्ना). — (L. 2) T G2 °ग्राम(G2 °ग्रामा)खेटखर्वटपत्तना. — (L. 3) T G2 मही सर्वा; G1.3 च सर्वत्र; M1 च नः सर्वा (for च तत्सर्वं).]

— ^{c}) K मतश्चापि; B2 D5 (m as in text).6 न ते संति; D10 तन्नः शाधि; T G2 अत ऊर्ध्वं; G1 M पुनः शाधि; G3 अतः शाधि (for स नः शाधि). Ca cites स नः, Cc स and

अन्वेषणे पाण्डवानां भूयः किं करवामहे ।
इमां च नः प्रियामीक्ष वाचं भद्रवतीं शुभाम् ॥ १८
येन त्रिगर्ता निकृता बलेन महता नृप ।
सूतेन राज्ञो मत्स्यस्य कीचकेन महात्मना ॥ १९
स हतः पतितः शेते गन्धर्वैर्निशि भारत ।
अदृश्यमानैर्दुष्टात्मा सह भ्रातृभिरच्युत ॥ २०
प्रियमेतदुपश्रुत्य शत्रूणां तु पराभवम् ।
कृतकृत्यश्च कौरव्य विधत्स्व यदनन्तरम् ॥ २१ C. 4. 862 B. 4. 25. 22 K. 4. 29. 37

इति श्रीमहाभारते विराटपर्वणि चतुर्विंशोऽध्यायः ॥ २४ ॥

शाधि. — f) T G2 शाधि भूयो यदिच्छसि.

18 b) D6.10 करवाम ते; G1 करवाणि ते. — c) G1 मे (for नः). K चात्र; B वार्तां; Dn1 D1.3.10–12 वीर; Dn2 D6 वीक्ष्य; D2.7.8 ईक्ष्य; D4 धीर; S ईषद्; Cc.rp (Cat.) ईक्ष (as in text). — d) B1.4.5 D7m शृणु (for वाचं). Dn1 D1–4.8.10–12 S शृणु (for शुभाम्). B2 भद्रं तुभ्यो नरेश्वर. Cr has वाचं शृणु (for Crp see above).

19 a) K B1.2.5 Dn D5.8.11.12 T1 G1.3 निहता; D9.10 विकृता; Ca as in text. D3 (by transp.) त्रिगर्ता निकृता येन. — b) S बहुशो (for महता). G1.3 नृपाः. — c) S (except G1) मात्स्यस्य. — d) K B1.3 D1.3.5m.6.7.9 पुनः पुनः; B2.4.5 D4.5.8.10 M दुरात्मना; Dn D11.12 बलीयसा (for महात्मना).

20 a) D1–3.10 M1–3 पातितः. — After 20^{ab}, S ins.:

505* ख्यातो राज्ञो विराटस्य सेनापतिरुदारधीः ।
सुदेष्णाया महाज्येष्ठः शूरो वीरो गतव्यथः ।
उत्साहवान्महावीर्यो नीतिमान्बलवानपि ।
युद्धज्ञो रिपुवीरघ्नः सिंहतुल्यपराक्रमः ।
प्रजारक्षणदक्षश्च शत्रुग्रहणशक्तिमान् । [5]
विजितारिर्महायुद्धे प्रचण्डो मानतत्परः ।
नरनारीमनोह्लादी धीरो वाग्मी रणप्रियः ।
पुण्यधर्मार्थकामानां भाजनं मनुजोत्तमः ।

[(L. 1) T1 G1.3 M4 विराटराजस्य (for राज्ञो विरा°). — (L. 5) T1 G1.3 °णशक्तश्च.]

T G cont.:

506* स हतो निशि गन्धर्वैः स्त्रीनिमित्तं नराधिप ।

T G2 cont.:

507* गन्धर्वाणां च महिषी काचिदस्ति नितम्बिनी ।
सैरन्ध्री नाम तां ह्यसौ दुष्टात्माकामयद्बली ।

— M om. 20^{cd}, but cf. line 5 of 509*. — c) T G अमृष्यमाणो दु°. — d) D7.9 अप्युत (for अच्युत). K सहबंधुससोदरः; Dn D11.12 भ्रातृभिः सह सोदरैः; T G निशीथे सह सोदरैः. — After 20^{cd}, T G ins.:

508* सुहृदश्चात्र निहता योधाश्च प्रवरा हताः ।

T G cont.: M ins. after 505*:

509* इत्येवं श्रुतमस्माभिर्गन्धर्वैर्निहतो निशि ।
बान्धवैर्बहुभिः सार्धं कीचको निहतोऽभवत् ।
अद्य प्रभृति राजेन्द्र पाण्डवान्वेषणं प्रति ।
चारांस्तान्सर्वतश्चर्तुं प्रेषयेति मतिर्हि नः ।
निहतो निशि गन्धर्वैर्दुष्टात्मा भ्रातृभिः सह ।

[(L. 1) M1.2 सैरंध्रीकारणात् (for गन्धर्वैर्निहतो). — (L. 4) T2 M3 च; M1.2 तु (for तान्). M1 स त्वं; M2 सर्वान् (for चर्तुं). G1 सर्वांश्चारान्विचरितुं (for the prior half). M2 प्रेषिति स्म (for प्रेष°). G1.3 संप्रेषयितुमर्हसि.]

21 a) S प्रियं तदुपसं(M1 तावदुप)श्रुत्य. — b) K B4 D8.10 त्वं; B1.3 D7.9 M1 ते; B2.5 Dn D4–6.11.12 M3 च; D1–3 तं (for तु). — After 21^{ab}, T G2 ins.:

510* एतावच्छ्रुतमस्माभिर्भद्रं तेऽस्तु नराधिप ।

— c) G1.3 M तु (for च). T G2 विचार्य शुद्धया बुद्ध्या.

Colophon missing in Ś1; D7 om. it; D9 reads it in marg. — *Adhy. name:* B1 चारप्रत्यागमः; B2–5 D2–4.6.8 चारप्रत्याचारः; Dn D9m.11.12 चारप्रत्यागमनं; D1.5 चारप्रचारः; D10 चारप्रत्याख्यानं; G2 M3 पाण्डवान्वेषणं; M1 पाण्डवादर्शननिवेदनं. — *Adhy. no.* (figures, words or both): B4 D6.10 24; D5.9m 25; S 28 (M2.4.5 27; M3 broken). — *S'loka no.:* G3 36.

25

1 In Ś1, st. 1–10 are missing (cf. v. l. 4. 22. 12). — a) D4 अथाब्रवीन्महावीर्यो. — b) Dn D11.12 ज्ञात्वा (for श्रुत्वा). D4 राजा दुर्योधनस्तथा. — D7 ins. after 1^{ab}: D2(om. lines 2–4).8 ins. after 3^{ab}:

511* जानन्नपि महाराज सशल्येनान्तरात्मना ।
कीचकस्य वधं श्रुत्वा न चाकारमदर्शयत् ।

२५

C. 4. 883 B. 4. 26. 1 K. 4. 30. 1 वैशंपायन उवाच ।

ततो दुर्योधनो राजा श्रुत्वा तेषां वचस्तदा ।
चिरमन्तर्मना भूत्वा प्रत्युवाच सभासदः ॥ १
सुदुःखा खलु कार्याणां गतिर्विज्ञातुमन्ततः ।
तस्मात्सर्वे *उदीक्षध्वं क्व नु स्युः पाण्डवा गताः ॥ २
अल्पावशिष्टं कालस्य गतभूयिष्ठमन्ततः ।
तेषामज्ञातचर्यायामस्मिन्वर्षे त्रयोदशे ॥ ३
अस्य वर्षस्य शेषं चेद्व्यतीयुरिह पाण्डवाः ।
निवृत्तसमयास्ते हि सत्यव्रतपरायणाः ॥ ४
क्षरन्त इव नागेन्द्राः सर्वे आशीविषोपमाः ।
दुःखा भवेयुः संरब्धाः कौरवान्प्रति ते ध्रुवम् ॥ ५
अर्वाक्कालस्य विज्ञाताः कृच्छ्ररूपधराः पुनः ।
प्रविशेयुर्जितक्रोधास्तावदेव पुनर्वनम् ॥ ६
तस्मात्क्षिप्रं बुभुत्सध्वं यथा नोऽत्यन्तमव्ययम् ।
राज्यं निर्द्वन्द्वमव्यग्रं निःसपत्नं चिरं भवेत् ॥ ७
अथाब्रवीत्ततः कर्णः क्षिप्रं गच्छन्तु भारत ।

केवलं शौर्यमालम्ब्य गतसत्त्व इव श्वसन् ।
भूयः प्रत्यागतप्राणो धृतराष्ट्रात्मजो बली ।
[(L. 4) D_8 °प्राणैः शरीरस्थैश्च प्रेक्षकाः.]

D_8 cont.:

512* श्रुत्वा तेषां वचस्तावच्चिन्तयामास कौरवः ।

— ^{c}) K विरमंतस्तथा भूत्वा; D_4 श्रुत्वा तेषां तदा वाक्यं; T_1 G_1 चिरं तु तन्मना भू°; G_3 चिरं मंदमना भू°. **Ca** cites चिरमन्तर्मनाः (as in text). — ^{d}) D_4 तानुवाच; S इदमाह (for प्रत्यु°).

2 $Ś_1$ missing. — Before 2, S (except M_5) ins. दुर्योधनः. — ^{a}) S अशक्या (for सुदुःखा). — ^{b}) D_{10} वै ज्ञातुं; S ज्ञातुं हि (for विज्ञातुं). S तत्त्वतः (for अन्ततः). **Ca** cites 2^{ab} entirely as in text. — $D_{3.9}$ om. (hapl.) 2^{c}–3^{b}. — ^{c}) K B_{1-3} Dn $D_{5.11.12}$ T_2 **Cc** निरीक्षध्वं; $B_{4.5}$ $D_{1.2.4.7}$m$_{.8}$ ह्युदीक्षध्वं; D_6 -भ्युदीक्षध्वं; D_7 विनीक्षध्वं; D_{10} प्रतीक्षध्वं; T_1 G M परीक्षध्वं. — ^{d}) K_1 केन; K_2 क्व ते (for क्व नु). B_3 Dn $D_{11.12}$ ते (for स्युः).

3 $Ś_1$ missing; $D_{3.9}$ om. 3^{ab} (cf. v. l. 2). — ^{a}) S °वशेषः (T_2 M_1 °वशिष्टः) कालोयं (M °लस्तु). — ^{b}) K_1 गतिभू°; K_2 गतिर्भू°; B (except B_5) Dn_1 $D_{1.2.4.5.10}$ गतं भू°. **Cc.r** cite भूयिष्ठं. S गतभूयिष्ठ एव च ($M_{3.4}$ तु). **Ca** cites 3^{ab} entirely as in text. — After 3^{ab}, D_2 (om. lines 2–4)$_{.3}$ ins. 511* (cf. v. l. 1). — ^{c}) K D_4 °चर्यायाः; B_{1-3} $D_{6.8}$ M (except M_5) °चर्याणां. — ^{d}) K M_4 तस्मिन्वर्षे; B_4 वर्षे ह्यस्मिन्.

4 $Ś_1$ missing. — ^{a}) D_{10} तस्य; S अपि (for अस्य). T_2 वर्षं ह्यशेषं. Dn_2 $D_{9.11.12}$ च; $D_{1.3.6.8}$ वै (for चेद्). — ^{b}) D_6 G_1 यदि; G_3 M_3 इति (for इह). — ^{c}) G_1 °मनसस् (for °समयास्). D_8 पार्थाः; T G M_3 तेपि; M_5 ते तु (for ते हि). — ^{d}) K सत्यधर्म°; D_4 सत्यवृत्त°; D_8 महात्मानो महाबलाः.

5 $Ś_1$ missing. — ^{a}) D_6 स्फुरंतः; **Ca** क्षरन्तः (as in text). D_8 जीमूताः (for नागेन्द्राः). — ^{b}) D_{1-3} सर्पाः (for सर्वे). K_2 $B_{4.5}$ Dn_1 D_8 T G_2 $M_{1.4.5}$ ह्याशी°; $D_{6.7.9}$ चाशी° (for आशी°). — ^{c}) $D_{2.3.10}$ S (except M_4) दुःखाद्; **Ca.c.s** दुःखाः (as in text). — ^{d}) T_1 कौरव्याः; $G_{2.3}$ कौरव्यान्. D_{1-3} क्षणं (for ध्रुवम्). — After 5, S ins.:

513* विज्ञातव्या मनुष्येन्द्रास्तर्कया सुप्रणीतया ।
निपुणैश्चारपुरुषैः प्राज्ञैर्दक्षैः सुसंवृतैः ।
[(L. 1) Cf. 10^{cd}. — (L. 2) Cf. 11^{b}. $G_{1.3}$ समावृतैः; M_2 सुसंमतैः.]

6 $Ś_1$ missing. — ^{a}) $B_{1.2}$ Dn_1 D_{11}m सर्वे; B_3 अधिक-; B_4 यथा; B_5 damaged; Dn_2 $D_{11.12}$ अथ; D_3 वर्ष-; **Ca.c.r** अर्वाक् (as in text). B_4 Dn_2 D_{11}(m as in text)$_{.12}$ काले च; **Cr** काले तु; **Ca.c.rp** कालस्य (as in text). Dn_1 D_{11}m वेत्तारः (for विज्ञाताः). S अज्ञातसमये ज्ञाताः. — ^{b}) B_4 ततः; Dn_1 D_{11}m स्थिताः (for पुनः).

7 $Ś_1$ missing. — ^{a}) B_3 शीघ्रं (for क्षिप्रं). K B Dn $D_{6.8.11.12}$ बुभूषध्वं; D_{1-3} हि बुध्यध्वं; D_4 प्रभाषध्वं; S वि(G_3 प्र)चिन्वध्वं; **Ca** बुभुत्सध्वं (as in text). $D_{7.9}$ तस्माद्बुभुत्सुभिः शर्म. — ^{b}) Dn $D_{11.12}$ ते; D_1 स्वं; S च (for नो). B $D_{5-7.9}$ प्रतिकर्तव्यमव्ययं ($B_{2.5}$ D_5 °मस्य यत्); D_4 यथा जानीत पांडवान्; D_8 यथान्योन्यं तदव्ययं. — D_4 om. 7^{cd}. — ^{c}) K राज्ञो (for राज्यं). $D_{1.3}$ अद्वंद्वम् (for निर्द्वन्द्वम्). — ^{d}) T G_2 M असपत्नं (for निःस°). $D_{5.7.9}$ स्थिरं; D_{10} इदं; **Cc.r** चिरं (as in text).

8 $Ś_1$ missing. — Before 8, S ins. वैशं°. — T G_2 cont.:

अन्ये धूर्ततरा दक्षा निभृताः साधुकारिणः ॥ ८
चरन्तु देशान्संवीताः स्फीताञ्जनपदाकुलान् ।
तत्र गोष्ठीष्वथान्यासु सिद्धप्रव्रजितेषु च ॥ ९
परिचारेषु तीर्थेषु विविधेष्वाकरेषु च ।
विज्ञातव्या मनुष्यैस्तैस्तर्कया सुविनीतया ॥ १०
विविधैस्तत्परैः सम्यक्तज्ज्ञैर्निपुणसंवृतैः ।
अन्वेष्टव्याश्च निपुणं पाण्डवाश्छन्नवासिनः ॥ ११
नदीकुञ्जेषु तीर्थेषु ग्रामेषु नगरेषु च ।
आश्रमेषु च रम्येषु पर्वतेषु गुहासु च ॥ १२
अथाग्रजानन्तरजः पापभावानुरागिणम् ।
ज्येष्ठं दुःशासनस्तत्र भ्राता भ्रातरमब्रवीत् ॥ १३
एतच्च कर्णो यत्प्राह सर्वमीक्षामहे तथा । C. 4. 897 B. 4. 26. 15 K. 4. 30. 17

514* दुर्योधनेनैवमुक्ते वचनेऽतीव दुःखिना ।
— ^{a}) D8. 10 तु तं (for ततः). K अब्रवीत्तं ततः कर्णः; S ततः कर्णोऽब्रवीद्वाक्यं. — After 8^{a}, T G2 ins.:

515* सत्यधर्मार्थसंयुतम् ।
कर्णः ।
एते पुनर्न गच्छन्तु

— ^{b}) S अन्ये (for क्षिप्रं). — ^{c}) B (except B4) D2. 4 अन्ये धूर्ताः (D2 °र्ते-) नरा दक्षाः; S शीघ्रवृत्ता नरा योग्याः (G1. 3 नरव्याघ्राः). Ca cites नो धूर्ततराः. — ^{d}) D5 (m as in text) S निपुणाः; Ca. c निभृताः (as in text). S छन्नचारिणः (for साधु°).

9 Ś1 missing. — ^{a}) T1 G M5 विविधान्; T2 M1–4 सचिवाः; Ca. c. v संवीताः (as in text). — ^{b}) D4. 10 स्फीतान् (D10 °ता) जनपदान्बहून्; T G2 °ञ्जनपदानपि; G3 देशाञ्जन°. Cs. v cite जनपदाकुलान् (as in text). — ^{c}) Dn2 D11. 12 यत्र; Ca. rp (Dev.) तंत्र-; Cr तत्र (as in text). S (except T2) गोष्ठेषु (for गोष्ठीषु). K2 रथ्यासु; B Dn D5. 6. 8. 10–12 रम्यासु; D1. 3 अथात्मासु; D7. 9 अथान्यत्र; T G M4 (*sup. lin.*) अरण्येषु; M चान्येषु (for अथान्यासु). — ^{d}) S सिद्धा (G3 °द्ध-) ब्राह्मणरूपिणः. — After 9, B2 ins.:

516* परिचारेषु तीर्थेषु ग्रामेषु नगरेषु च ।
($=10^{a}+12^{b}$).

10 Ś1 missing. K1 om. 10^{a}–12^{b}; K2 om. 10^{ab}. — ^{a}) B1 S परिवाहेषु; B3 (m as in text). 5 D1. 3. 10 Cr परिवारेषु; D4. 8 सरित्तीरेषु; D7 Ca परीवारेषु; Cc. rp (Cat.) as in text. Cs explains परिचाराः. — ^{b}) D4 ग्रामेषु नगरेषु च. — D6 om. 10^{c}–12^{d}. — T G read 10^{c}–11^{b} after 12. — ^{c}) D1–4. 7. 9. 10 ते (for तैः). K2 विविधे ग्रामनगरे; S °व्या मनुष्येंद्र (T2 M1. 2 °ष्येंद्राः; G1 °ष्यास्ते). — ^{d}) M सुप्रणीतया.

11 Ś1 resumes. K1 D6 om. 11 (cf. v. l. 10). T G read 10^{c}–11^{b} after 12. — ^{b}) D6. 7. 9 धूर्तैः (for तज्ज्ञैः). K2 निपुणसंहितैः; D1–3 °संश्रितैः; D5. 7. 9 °मादृतैः; D8 °वीक्षिभिः; D10 °संस्थितैः. D7 कृतज्ञैर्निपुणैः स्वयं; S निपुणैस्तज्ज्ञ(T2 °णैः ज्ञानि-; G1 °णैरर्थ-; G3 °णार्थज्ञ)संमतैः (M1 सत्तमैः). — ^{c}) K2 Dn2 D11. 12 तु निपुणैः (K2 °णं); B1. 3 च निपुणाः; B2 च निपुणैः; B5 Dn1 D8. 10 सुनिपुणैः (D8. 10 °णं); S मनुष्येंद्र (M4 °द्राः). — ^{d}) T1 G1. 3 विविधान् (T1 °धाः) (for पाण्डवाः). K2 B2 S छन्नचारिणः; B4 D5. 7. 9 छद्मवासिनः.

12 K1 om. 12^{ab}; D6 om. 12 (cf. v. l. 10). T G read 10^{c}–11^{b} after 12. — ^{ab}) K2 D8 S नदीकूले- (G2 °पे)षु; B4 D4 °तीरेषु. Ś1 transp. तीर्थेषु and ग्रामेषु. D2 तीरेषु; D5. 7. 9 ग्रामेषु; M4 व्रजेषु (for तीर्थेषु). D5. 7. 9 अरण्य-; T G M2. 3 व्रजेषु; M1 ह्रदेषु (for ग्रामेषु). K2 गतं प्रश्रवणेषु च; M5 ह्रदेषु च सरस्सु च. — G1 om. 12^{cd}. — ^{c}) B4 सर्वेषु; D1–4 पुण्येषु (for रम्येषु). — ^{d}) S (G1 om.) वनेषु (for गुहासु).

13 Before 13, S (except T G2) ins. वैशं°. — ^{a}) K2 अथाग्रजातं तरसा; Cs as in text. — ^{b}) Ś1 B1. 3. 5 Dn D11. 12 °नुरागवान्; B4 °नुकारिणं; T G भ्रातुः प्रियहिते रतः; M पापभावः सुदुर्मतिः. — ^{c}) T1 G2 दुर्योधनं (for दुःशासनस्). — ^{d}) G1. 3 भ्रातरं त्विदमब्र°. — After 13, all MSS. (except M) ins.:

517* येषु नः प्रत्ययो राजंश्चारेषु मनुजाधिप ।
[Before the line, T G ins. दुःशासनः. — T G एष (for येषु). D1. 3 च; D2 अस्ति (for नः). K B4 मनुजेश्वर; D1–3. 7. 9 T G मनुजर्षभ; D4 भरतर्षभ.]

Ś1 B Dn D2 (marg.). 5–7. 9–12 cont.:

518* ते यान्तु दत्तदेया वै भूयस्तान्परिमार्गितुम् ।
[Ś1 पुनस् (for भूयस्).]

On the other hand D2. 4 ins. after 517*:

519* तानहं प्रेषयिष्यामि यतन्तो दृढभक्तयः ।
[D4 ये तज्ज्ञा (for यतन्तो).]

D4 cont.: D5 (marg.) ins. after 518*:

520* एतन्मतं महाराज मदीयं प्रियदर्शन ।
[D5 महाभाग (for °राज), and शुभ° (for प्रिय°).]

Finally, D8 ins. after 517*:

521* अपरे तत्र गच्छन्तु चराः प्रच्छन्नचारिणः ।

C. 4. 897
B. 4. 26. 15
K. 4. 30. 17

यथोद्दिष्टं चराः सर्वे मृगयन्तु ततस्ततः ।
एते चान्ये च भूयांसो देशाद्देशं यथाविधि ॥ १४
न तु तेषां गतिर्वासः प्रवृत्तिश्चोपलभ्यते ।
अत्याहितं वा गूढास्ते पारं वोर्मिमतो गताः ॥ १५
व्यालैर्वापि महारण्ये भक्षिताः शूरमानिनः ।
अथ वा विषमं प्राप्य विनष्टाः शाश्वतीः समाः ॥ १६
तस्मान्मानसमव्यग्रं कृत्वा त्वं कुरुनन्दन ।
कुरु कार्यं यथोत्साहं मन्यसे यन्नराधिप ॥ १७

इति श्रीमहाभारते विराटपर्वणि पञ्चविंशोऽध्यायः ॥ २५ ॥

---

14 D4 om. 14^{ab}. — Before 14, M ins. दुःशासनः. — ^{a}) S यदाह कर्णो राजेंद्र. — ^{b}) Ś1 B1 ईहामहे; B4 वीक्षा°; Dn D11.12 इच्छा°; some MSS. ईक्ष्या°. B3 वयं; D2 यथा (for तथा). S सर्वमेतदवेक्ष्यतां. — After 14^{ab}, S ins.:

522* घ्राणैः पश्यन्ति पशवो वेदैः पश्यन्ति ब्राह्मणाः ।
चारैः पश्यन्ति राजानश्चक्षुर्भ्यामितरे जनाः ।

[(L. 1) T G2 वेदैरेव द्विजोत्तमाः (T2 द्विजातयः).]

— ^{c}) S यथोक्ताश्चारपुरुषाः. — ^{d}) B1.3 मृगयंतस्; D1–3 विचिन्वंतु. Dn D5.6.11.12 यतस्ततः; D4 नरास्ततः; S पुनः पुनः. — ^{e}) K S (except T1) बहवो. D7.9 भूयो वै (for भूयांसो). — ^{f}) D1.2 देशोद्देशं; D6 देशे देशे (for देशाद्देशं). B4 D1.3 यथा विधिः. S (except T1) देशांश्च नगराणि च. — For S, cf v. l. 16 also.

15 ^{a}) D4 S न च (T1 नेति); D7 ननु (m न तु). D4 क्वचिद् (for गतिर्). — ^{b}) B5 D3.5.7.9 S वा; D2 नः; D8 न (for च). B4 D1.3.7 उपलक्ष्यते; D2 अपि लक्ष्यते. — T1 om. 15^{c}–16^{d}. — ^{c}) Ś1 B (except B2) Dn D4.6.7.9.11.12 अत्यंतं वा निगूढास्ते; D3 °हितं निगूढास्ते; D8 अत्यंतभावं गूढास्ते; S (T1 om.) प्रत्यागताश्च (M4 orig. अत्याहिताश्च; *sup. lin.* °हिता वा) गूढास्ते (M4 *sup. lin.* °ढा वा). — G1 (hapl.) om. 15^{d}–16^{b}, as also line 1 with prior half of line 2 of 524* (cf. v. l. 16). — ^{d}) Ś1 B (except B4) Dn D1.2.4.7.9.11.12 च (for वा). Ś1 ऊर्मिमितो (for °मतो). K परं बोधयतो (K2 °थो) गताः; S (T1 G1 om.) पारमूर्मिगणा इव. Ca.c.s cite ऊर्मिमतः (as in text). — After 15, D7.9 ins.:

523* प्रत्याहर्तुं च मूढास्ते पथि नाशमतो गताः ।

16 T1 om. 16; G1 om. 16^{ab} (cf. v. l. 15). — ^{a}) K1 व्याघ्रैः; Ca व्यालैः (as in text). K om. वा. Ś1 B1.3.4 Dn D3.11.12 च (for वा). — ^{b}) S (except M1.3; T1 G1 om.) निहताः (for भक्षिताः). D8 शूरसंमताः; M3 राक्षसैर्भृशं (for शूर°). — T2 G2.3 M ins. after 16^{ab}: G1 (om. line 1 and the prior half of line 2) ins. after 15^{c} (cf. v. l. 15):

524* द्वीपं वा परमं प्राप्ता गिरिदुर्गं वनानि वा ।
हीनदर्पा निराशास्ते भक्षिता वापि राक्षसैः ।

[(L. 1) T2 G (G1 om.) गिरिदुर्ग(G3 °र्गे)वनेष्वपि. — (L. 2) M1–3 भक्षिता राक्षसैर्भृशं.]

— ^{c}) D4 प्राप्ताः; Cr प्राप्य (as in text). — After 16, S (T1 om.) repeat 14^{c}–15^{b} with v. l. [14^{c}) S (T1 om.) °दिष्टाश्. G2 च ते (for चराः). — 14^{d}) S (T1 om.) देशान्गच्छंतु संवृताः. — 14^{e}) S (T1 om.) भूयांसो (for बहवो). — 15^{ab}) S (T1 om.) इति (for न तु), and वा (for च).]

17 ^{a}) B4 आत्मानम् (for मानसम्). — ^{b}) Dn1 D10 तत्; D8 तु (for त्वं). S कृत्वात्मानं नियम्य च. — ^{c}) Ś1 B1–3 Dn D11.12 महो° (for यथो°). — ^{d}) S यन्मन्यसि नरा°.

Colophon. — *Sub-parvan:* Ś1 गोग्रह. — *Adhy. name:* K1 B Dn2 D3.6.7.9.10–12 चार(D10 om. it)-प्रत्याचारः; D1.2.4.8 चारविचारः (D8 cont. समाप्तः); D5 चारप्रचारः; T2 G2 चारप्रेषणं. — *Adhy. no.* (figures, words or both): K1 B4 D6.10 25; D5 26; T G M1 29; M2.4.5 28; M3 broken. — *S'loka no.:* G3 22.

26

1 ^{a}) D1.3 महाबाहुः; D2 °बाहो; D6 °वीरः; S सभामध्ये. — ^{b}) D5 (by corr.).7 (m as in text).9 °दर्शनः; S सूक्ष्मार्थदर्शिवान् (G1 M3 °तत्त्ववित्; M1.2.4.5 °दर्शनः). — D10 om. 1^{c}–2^{b}. — ^{d}) B (except B4) Dn2 D11.12 न प्रयांति; Dn1 न प्राप्स्यंति; D1.3 प्राप्नुवंति; D2 नाप्नुवंति; D6 न ते यांति.

2 D10 om. 2^{ab} (cf. v. l. 1). — ^{c}) D7.9 धार्मिकाः (for धर्मज्ञाः). S धर्मज्ञाः सत्यसंधाश्च. — ^{d}) B3.4 D5 (by corr.).7.9 राजधर्मम्; S युधिष्ठिरम् (for धर्म°). Dn2 D11.12 महेष्वासा महाबलाः.

२६

वैशंपायन उवाच ।

अथाब्रवीन्महावीर्यो द्रोणस्तत्त्वार्थदर्शिवान् ।
न तादृशा विनश्यन्ति नापि यान्ति पराभवम् ॥ १
शूराश्च कृतविद्याश्च बुद्धिमन्तो जितेन्द्रियाः ।
धर्मज्ञाश्च कृतज्ञाश्च धर्मराजमनुव्रताः ॥ २
नीतिधर्मार्थतत्त्वज्ञं पितृवच्च समाहितम् ।
धर्मे स्थितं सत्यधृतिं ज्येष्ठं ज्येष्ठापचायिनम् ॥ ३
अनुव्रता महात्मानं भ्रातरं भ्रातरो नृप ।
अजातशत्रुं ह्रीमन्तं तं च भ्रातॄननुव्रतम् ॥ ४
तेषां तथा विधेयानां निभृतानां महात्मनाम् ।
किमर्थं नीतिमान्पार्थः श्रेयो नैषां करिष्यति ॥ ५
तस्माद्यत्नात्प्रतीक्षन्ते कालस्योदयमागतम् ।
न हि ते नाशमृच्छेयुरिति पश्याम्यहं धिया ॥ ६
सांप्रतं चैव यत्कार्यं तच्च क्षिप्रमकालिकम् ।
क्रियतां साधु संचिन्त्य वासश्चैषां प्रचिन्त्यताम् ॥ ७
यथावत्पाण्डुपुत्राणां सर्वार्थेषु धृतात्मनाम् ।
दुर्ज्ञेयाः खलु शूरास्ते अपापास्तपसा वृताः ॥ ८
शुद्धात्मा गुणवान्पार्थः सत्यवान्नीतिमाञ्शुचिः ।
तेजोराशिरसंख्येयो गृह्णीयादपि चक्षुषी ॥ ९
विज्ञाय क्रियतां तस्माद्भूयश्च मृगयामहे ।
ब्राह्मणैश्चारकैः सिद्धैर्ये चान्ये तद्विदो जनाः ॥ १० C. 4. 911 B. 4. 27. 10 K. 4. 31. 11

इति श्रीमहाभारते विराटपर्वणि षड्विंशोऽध्यायः ॥ २६ ॥

---

3 a) Ś1 नीतितत्वार्थतत्वज्ञं; B (except B3) Dn2 D5.6.8.11.12 T G M4 °तत्वज्ञाः; D7.9 नीतितत्वार्थधर्मज्ञाः. — b) K पितृभक्तं; B4 D6 प्रीतिमंतः; D8 इंद्रियेषु (for पितृवच्च). Cc.r cite पितृवत्. B (except B4) D5–9 T G2 Cr समाहिताः; D4 सदा हितम्; G1.3 सदा नृप (G3 °पम्). Ś1 पितृसेवासमा°. — c) D8 सत्यरतिं; M5 सत्यसंधं. ❀Cc: स्थिरा धृतिर्यस्य ।❀ — d) D11.12 T2 श्रेष्ठं (for ज्येष्ठं). Ś1 D6 Crp ज्येष्ठापचायिनः; K2 ज्येष्ठोपयायिनं; B Dn D2.3.5.7.9–12 Cr ज्येष्ठानुयायिनः (D3 °नं); D4 ज्येष्ठोपचारिणं; T1 श्रेष्ठोप°; T2 G2 ज्येष्ठाभिधायिनः (G2 °नं); G1.3 श्रेष्ठगुणान्वितं; M2 ज्येष्ठोप°.

4 a) B4 S (except G1.3) °त्मानो. — b) Ś1 B3 Dn1 D6 M transp. भ्रातरं and भ्रातरः. B2.4.5 Dn1 D5.10 नृपं; M प्रियं. B1 भ्रातरो नृपसत्तम; T G भ्रातरो भ्रातृवत्सलं. — c) B D5 धीमंतं; Dn D11.12 श्रीमंतं; D7.9 भीमश्च; T G M1–3.5 दुर्धर्षं. M4 °शत्रुर्दुर्धर्षः. — d) Ś1 Dn D8.10–12 सर्वं-; D1–4 तांश्च; D6 ते च; D7.9 तौ च. D6 °व्रतान्; D7.9 °व्रतौ. T G2 स च तान्नातिवर्तते; G1.3 स तानपि तथानुजान्; M स (M5 न) चापि हि तथानुजान् (M4 °नुजाः).

5 c) S प्राज्ञो (for पार्थः). — d) K2 D2.4 तेषां (for नैषां). D1–8 विधास्यति (for करि°). S न श्रेयो (T G2 निःश्रेयो; G1.3 यच्छ्रेयो) न करि°.

6 a) K यस्मात्; D10 पुनः; T G यत्ताः (for यत्नात्). Ś1 D1–4 G1.3 प्रतीक्षध्वं; K °क्षंतः; T G2 M परीक्षध्वं. — b) S यावन्न (T G1.2 न तावत्; G3 न यावत्) समयो गतः. — c) Ś1 अर्छैरन्; K अभ्येरन्; B4 अर्हंति; Dn1 D2 इच्छेयुः; D1.3 अर्हेयुः; D4 एष्यंति; D5 Cv ऋच्छेरन्. D6.7.9 न ते नाशं गताः शूराः; S न ते विनाशमृच्छेयुः (M1.2.4 °मिच्छेयुः). — d) B3 इति पश्यामहे वयं; S इति मे नैष्ठिकी मतिः.

7 a) S चिंत्यतां; Ca.v सांप्रतं (as in text). M1.2.4 कृत्यं; M3 क्षिप्रं (for कार्यं). — b) D2 अत्र; D4 भवेत् (for तच्च). G1 अलिंगकं; M विचार्य वै (M2 विधीयतां); all comm. अका° (as in text). — After 7^{ab}, M2 reads line 2 of 526* for the first time, repeating it in its proper place. — c) T G चैव (for साधु). D7.9 यन्नित्यं; S निश्चित्य (for संचिन्त्य). — d) D6.7.9 G1 M वि- (for प्र-). — After 7, B5 (irrelevantly) ins.:

525* तथाभिवादिनं मत्स्यं कौरवेयाः पृथक्पृथक् ।
ऊचुः प्राञ्जलयः सर्वे युधिष्ठिरपुरोगमाः ।
प्रतिनन्दाम ते वाक्यं सर्व एव विशां पते ।

8 a) S यथा च (for यथावत्). — b) S हितात्मनां; Cap.rp (Dev.) दृढा°; Ca.r.v धृता° (as in text).

२७

C. 4. 912
B. 4. 28. 1
K. 4. 31. 13

वैशंपायन उवाच ।
ततः शांतनवो भीष्मो भरतानां पितामहः ।
श्रुतवान्देशकालज्ञस्तत्त्वज्ञः सर्वधर्मवित् ॥ १
आचार्यवाक्योपरमे तद्वाक्यमभिसंदधत् ।
हितार्थं स उवाचेमां भारतीं भारतान्प्रति ॥ २
युधिष्ठिरे समासक्तां धर्मज्ञे धर्मसंश्रिताम् ।
असत्सु दुर्लभां नित्यं सतां चाभिमतां सदा ।
भीष्मः समवदत्तत्र गिरं साधुभिरर्चिताम् ॥ ३
यथैष ब्राह्मणः प्राह द्रोणः सर्वार्थतत्त्ववित् ।
सर्वलक्षणसंपन्ना नाशं नार्हन्ति पाण्डवाः ॥ ४
श्रुतवृत्तोपसंपन्नाः साधुव्रतसमन्विताः ।
वृद्धानुशासने मग्नाः सत्यव्रतपरायणाः ॥ ५

— After 8^{ab}, S ins.:

526* प्रवृत्तिरुपलभ्येत तथा नीतिर्विधीयताम् ।
सर्वोपायैर्यतस्व त्वं यथा पश्यसि पाण्डवान् ।

— ^{c}) $D_{1.2}$ transp. शूराः and ते. — ^{d}) $B_{1-3.5}$ Dn $D_{8.11.12}$ दुरापास्; B_4 D_6 निष्पापास्; D_1 तेपापास्; D_2 ते पार्थास्; D_5 त्वपापास्; D_7 (m as in text) स्वपापास्; D_{10} ह्यपापास्. S रक्ष्या नित्यं च ($M_{1.2}$ हि) दैवतैः.

9 ^{a}) B_2 $D_{5.7.9}$ बुद्धिमान्; B_4 D_4 श्रद्धावान्; D_6 शुद्धिमान् (for शुद्धात्मा). S (except T_2) ज्ञान° (for गुण°). $D_{1.3}$ शूरः (for पार्थः). — ^{b}) D_8 सत्यवाक्; $G_{1.3}$ सत्यात्मा. — ^{c}) D_7 (m as in text) तेजोगतिर्. $D_{7.9}$ असंज्ञेयो (D_7 m इवासंख्यो). Cf. Ca असंख्येयतेजोरश्मित्वात्. S °राशिभिरापूर्णो. — ^{d}) $B_{1.3.5}$ D_5 Cn.ap.rp (Dī.) चक्षुषा; Ca.r.v चक्षुषी (as in text). $D_{1.3}$ निगृह्णीयाद्धि चक्षुषी; T_1 (first time) $G_{1.3}$ यथा लोके दिवाकरः; T (T_1 second time) G_2 M दहेदपि च चक्षुषा.

10 ^{a}) D_4 यत्नो (for तस्माद्). B_3 तस्माद्विज्ञायतां तात; S तस्माद्यत्नश्च क्रियतां. — ^{b}) D_{1-3} अपि; $D_{6.7.9}$ वा (for च). $D_{7.9}$ मृग्यतां बलैः (for मृग°). — ^{c}) $Ś_1$ K B_2 D_5 चारणैः; B_4 चापरैः; $D_{7.9}$ च चरैः. M °णैश्चारपुरुषैः. — ^{d}) D_{7-9} तद्विधा. T G तापसैर्निपुणैरपि; M सिद्धैस्तापसनैपुणैः. — After 10, T_1 repeats 4. 25. 11 (v. l. निर्भीतैस्तज्ज्ञसंमतैः for 11^{b}).

Colophon om. in D_7 S; D_9 reads it in marg. — *Adhy. name:* K $D_{3.4}$ चारप्रत्याचारः; $B_{1.3}$ Dn_1 $D_{5.6.8.9m.11.12}$ द्रोणवाक्यं; $B_{2.4.5}$ Dn_2 D_{10} चारप्रत्याचारे द्रोणवाक्यं; $D_{1.2}$ चारविचारः. — *Adhy. no.* (figures, words or both): $Ś_1$ K_1 B_4 $D_{6.10}$ 26; Dn_2 $D_{5.9m}$ 27.

27

1 ^{a}) S (except M_4) धीमान् (for भीष्मो). — ^{b}) B_4 $D_{1.3.4}$ T_1 G भारतानां; D_5 कौरवाणां. D_4 धुरंधरः (for पिता°). — ^{d}) S नीतिमांश्च महामतिः.

2 ^{a}) S तस्मिन्नुपरते वाक्ये. — ^{b}) B_2 D_{10} अभ्यनंदत; D_2 अभिसंदढेत्; D_4 अभिपूज्य च; $D_{5m.7.9}$ °संवदन् (D_7 m अभिनंदयन्); Ca.c.s.v as in text. S आचार्यस्य महात्मनः. — ^{c}) K कृतार्थं. $Ś_1$ B (except B_4) Dn $D_{3.6.11.12}$ समुवाच (for स उ°). Cn cites उवाच. B Dn $D_{11.12}$ एनां; Cr इमां (as in text). $D_{5m.7}$ (m as in text) हितार्थमाहार्थवतीं; S अनंतरमुवाचेदं. — ^{d}) Dn $D_{3.5.8.9.11.12}$ भरतान् (for भारतान्). S वाक्यं हेत्वर्थदर्शनं (T_2 G_2 °र्शिनं).

3 ^{a}) B_4 Dn_2 D_{10} $G_{1.2}$ M समायुक्तां (G_1 °क्तो); Ca °सक्तां (as in text). — ^{b}) K_1 धर्ममाश्रितां; $B_{1.3}$ °माश्रिताः; B_2 °संश्रिताः; Dn $D_{11.12}$ °संवृतां; D_{1-3} T G $M_{2.3.5}$ °संहितां; D_4 °संस्थितिं; D_6 °संभृतां; $M_{1.4}$ °संयुतां. B_4 भीष्मः सुधर्मसंश्रितां. — After 3^{ab}, S ins.:

527* पाण्डवे नित्यमव्यग्रां गिरं भीष्मः समाददे ।

— ^{c}) B_4 असत्ये; D_8 असतां. — ^{d}) B_4 सत्यं (for सतां). G_3 चानुमतां. — ^{e}) Cn समं वदत्; S त्वभ्यवदत् (for सम°). $Ś_1$ क्षत्रं; K_1 क्षत्तां; $D_{1.2.8.10}$ क्षिप्रं (for तत्र).

4 Before 4, S ins. भीष्मः. — ^{a}) $Ś_1$ K_2 $D_{4.5.7.9.10}$ यथैव; $B_{1.2.5}$ Dn यश्चैष; B_4 यथेह; S यथा नो ($M_{2.5}$ °थायं). B_2 भगवान् (for ब्राह्मणः). S अवादीत् (for प्राह). — ^{b}) $Ś_1$ D_{10} °धर्म° (for °तत्त्व°). S आचार्यः सर्वधर्मवित्. — After 4^{ab}, B_4 ins.:

528* तद्वाक्यमभिनन्दामि न मेऽस्त्यत्र विचारणा ।;

while D_2 (marg.) ins.:

529* निःसंशयं तथैवैतद्ब्रूयश्चैनां विबोधत ।

— T $G_{1.3}$ transp. 4^{cd} and 5^{ab}. — ^{d}) $B_{1.3.4}$ Dn $D_{4.7.9.11.12}$ T G_3 साधुव्रत(T G_3 °वृत्त)समन्विताः ($=5^{b}$); G_1 साधुवृत्तमनुव्रताः; G_2 न नाशं यांति पांडवाः; M नाशं नायांति पांडवाः. — After 4, Dn_1 ins. 530* (cf. v. l. 6).

5 T $G_{1.3}$ transp. 4^{cd} and 5^{ab}; Dn_1 om. 5^{a}–6^{b}; D_4

समयं समयज्ञास्ते पालयन्तः शुचिव्रताः ।
नावसीदितुमर्हन्ति उद्वहन्तः सतां धुरम् ॥ ६
धर्मतश्चैव गुप्तास्ते स्ववीर्येण च पाण्डवाः ।
न नाशमधिगच्छेयुरिति मे धीयते मतिः ॥ ७
तत्र बुद्धिं प्रणेष्यामि पाण्डवान्प्रति भारत ।
न तु नीतिः सुनीतस्य शक्यतेऽन्वेषितुं परैः ॥ ८
यत्तु शक्यमिहास्माभिस्तान्वै संचिन्त्य पाण्डवान् ।
बुद्ध्या प्रवक्तुं न द्रोहात्प्रवक्ष्यामि निबोध तत् ॥ ९
सा त्वियं साधु वक्तव्या न त्वनीतिः कथंचन ।
वृद्धानुशासने तात तिष्ठतः सत्यशीलिनः ॥ १०
अवश्यं त्विह धीरेण सतां मध्ये विवक्षता ।
यथामति विवक्तव्यं सर्वशो धर्मलिप्सया ॥ ११
तत्र नाहं तथा मन्ये यथायमितरो जनः ।
पुरे जनपदे वापि यत्र राजा युधिष्ठिरः ॥ १२ C. 4. 923 B. 4. 22. 15 K. 4. 31. 33

om. 5^{ab}. — ^{a}) K2 B3.5 D7.9 G1.3 श्रुतव्रतोपसंपन्नाः; B1.2 Dn2 D11.12 श्रुतव्रतोपपन्नाश्च; B4 श्रुतवृत्तो सुसंपन्नाः (sic); G2 सर्वलक्षणसं° (=4^{c}). — ^{b}) B1.3.4 Dn2 D11.12 नानाश्रुति(B4 °त)समन्विताः; B2.5 D7.9 नानाश्रुतिसमाहिताः; D8 G2 M साधुवृत्त°; T G1.3 नाशं नायांति पांडवाः. Cn cites नानाश्रुतिः. — ^{c}) B1–3.5 D1.2 M4 युक्ताः; B4 Dn2 D5–7.9–12 लग्नाः; D3.8 सक्ताः; T G M1–3.5 यत्ताः (for मग्नाः). D4 °शासनरताः. — ^{d}) D4 S °धर्म° (for °व्रत°).

6 Dn1 om. 6^{ab} (cf. v. l. 5). — ^{b}) D4 पारयंति; T G2 पालयंति. S (except G1.3) शुभव्रताः. — K2 B Dn2 D2 (marg. *sec. m.*).5–7.10–12 ins. after 6^{ab}; Dn1 (which om. 5–6^{ab}), after 4: D3, after 7^{ab}:

530* क्षत्रधर्मरता नित्यं केशवानुगताः सदा ।
प्रवीरपुरुषास्ते वै महात्मानो महाबलाः ।

[(L. 1) K2 B D5 °धर्मपराः; D6 क्षात्रे धर्मे रताः. B4 केशवानुरताः; Dn2 D5.6 °नुमताः. — (L. 2) D2 शास्त्रशास्त्ररता नित्यं; D10 उत्तीर्णसमयाचाराः (for the prior half).]

— ^{c}) B (except B4) D2.3.6.11.12 नावसीदतुं; Dn2 न च सीदितुं. S न विषीदंति ते पार्थाः. — ^{d}) Ś1 K चोद्वहंतः; D4 प्राद्वहंतः; D10 ह्युद्वहंतः.

7 ^{a}) S तपसा (for धर्मतः). — ^{b}) Ś1 B (except B4) Dn1 सुवीर्येण च; D1–3 स्वेन वीर्येण; D10 °र्येणापि. — After 7^{ab}, D3 ins. 530* (cf. v. l. 6). — ^{c}) T G अभिगच्छेयुः. — ^{d}) S नैष्ठिकी (for धीयते).

8 ^{a}) B1.3.5 Dn D11.12 प्रवक्ष्यामि; D4 प्रवेश्यामि; S प्रदास्यामि (for प्रणे°). — ^{b}) Ś पांडवान्वेषणे शृणु (M1 नृप). — Dn1 om. 8^{c}–9^{b}. — ^{d}) D9 S वेदितुं; Cs अन्वेषितुं (as in text).

9 Dn1 om. 9^{ab} (cf. v. l. 8). — ^{a}) B4 वाच्यं; Cr शक्यं (as in text). — ^{c}) K2 प्रवर्तुं; B (except B4) Dn D9–12 प्रयुक्तं; S प्रणेतुं; Cr प्रवक्तुं (as in text). S तद्वो(T G2 °त्ते)हं. — ^{d}) K विवक्ष्यामि; D1–3.8 यद्वक्ष्यामि; D4 तद्वक्ष्या°. B4 D4.6.8 G1.3 M4.5 निबोधत. — After 9, N (except D4) ins.:

531* न त्वियं मादृशैर्नीतिस्तस्य वाच्या कथंचन ।

[Ś1 K1 अद्य; K2 अप-; B4 तेषां; Ca. r. v तस्य (as above).]

10 ^{a}) K2 D4.8 साधुभिः; D9 S न त्वियं (for सा त्वियं). D4.8 वक्तव्यं. — ^{b}) D8 नाविनीतं; S तस्य नीतिः (for न त्वनीतिः). — ^{c}) Ś1 K M1 तत्र; Dn2 D11.12 नाम (for तात). — ^{d}) Ś1 B1.3.4 Dn D4.5.7.8.10–12 M3 तिष्ठता; B5 तिष्ठंते; D2 M1.2 तिष्ठंतः; D6 निभृताः; Cr as in text. Ś1 B4 Dn D4–6.8.11.12 सत्यशालिना; B1.3 D7.9 °शीलिना; D10 धर्मशालिना; S सत्यवादिनः. — After 10, S ins.:

532* अयुक्तं तु मया वक्तुं तुल्या मे कुरुपाण्डवाः ।
निवासं पाण्डुपुत्राणां संचिन्त्य च वदाम्यहम् ।
बहुना किं प्रलापेन यतो धर्मस्ततो जयः ।

11 ^{a}) K हि (for इह). Ś1 K Dn2 D8 वीरेण. S °इयं तु नि(M1 विनि-; M5 त्वनु)युक्तेन. — ^{b}) D6 S सभामध्ये. — ^{c}) B1–3.5 D5 °मति तु वक्तव्यं; B4 Dn D6 यथार्थमिति (Dn °मिह; D6 मभि-) वक्त°; D11.12 यथार्हमिह वक्त°; D4 T2 G2 °मति हि वक्त°; D8 °मतिर्विव°; D9 °मति विवे°; T1 G3 °मतिर्हि वक्तव्यं; G1 M1.2 °मति च वक्त°. Cr cites मति तु, Crp (Sr.) मति हि, Crp (Dev.) मतिरिति, Ca विवक्तव्यम्. — ^{d}) B4 सर्वार्थ-; Dn D10–12 सर्वथा; S सदृशं (G1 सूनृतं) (for सर्वशो).

12 ^{a}) B3 वक्ष्ये; Cr मन्ये (as in text). — ^{b}) S यथान्ये (M2 ये चान्ये) मेनिरे जनाः. — After 12^{ab}, N ins.:

533* निवासं धर्मराजस्य वर्षेऽस्मिन्वै त्रयोदशे ।
तत्र तात न तेषां हि राज्ञां भाव्यमसांप्रतम् ।

[(L. 1) B4 विवासं; D1–3.8 विवासः; D4 निवासः. B4 D5 ह्यस्मिन्; D7.9 -स्मिंस्तु. — (L. 2) D3 राज्ञो; D4 राजा; D7.9 राज्यं; D8 राज्ञा.]

On the other hand, S ins. after 12^{ab}:

534* निवासं पाण्डुपुत्राणां शृणुष्व मनुजाधिप ।

C. 4. 929 B. 4. 28. 17 K. 4. 31. 35 नासूयको न चापीर्षुर्नातिवादी न मत्सरी ।
भविष्यति जनस्तत्र स्वं स्वं धर्ममनुव्रतः ॥ १३
ब्रह्मघोषाश्च भूयांसः पूर्णाहुत्यस्तथैव च ।
क्रतवश्च भविष्यन्ति भूयांसो भूरिदक्षिणाः ॥ १४
सदा च तत्र पर्जन्यः सम्यग्वर्षी न संशयः ।
संपन्नसस्या च मही निरीतीका भविष्यति ॥ १५

रसवन्ति च धान्यानि गुणवन्ति फलानि च ।
गन्धवन्ति च माल्यानि शुभशब्दा च भारती ॥ १६
वायुश्च सुखसंस्पर्शो निष्प्रतीपं च दर्शनम् ।
भयं नाभ्याविशेत्तत्र यत्र राजा युधिष्ठिरः ॥ १७
गावश्च बहुलास्तत्र न कृशा न च दुर्दुहाः ।
पयांसि दधिसर्पींषि रसवन्ति हितानि च ॥ १८

T_1 cont.:

535* भ्रातृभिः सहितो वीरैः कृष्णया च महायशाः ।
किमर्थं स महाराजो नात्मश्रेयो भविष्यति ।
पाण्डवो निकृतः पूर्वं यथावद्विदितं तव ।
क्लेशितश्च पुरे नित्यं राज्यकामैश्च सांप्रतम् ।
छन्नश्चरति तस्मात्स प्रकृत्या नीतिमान्नृपः ।
वर्षमेकं सुसंछन्नमुष्य वासमनुत्तमम् ।
आयाति चोदये काले क्षिप्रं द्रक्ष्यसि पाण्डवम् ।
सोदरैः सहितं वीरं द्रौपद्या च परंतप ।
संविधत्स्व महाबाहो यथा न स्यात्सुखोदयः ।
यस्मिन्स राजा वसतिश्छन्नः सत्त्वभृतां वरः ।
भविष्यन्ति नरास्तत्र रागमोहविवर्जिताः ।
नाधयो हि महाराज न व्याधिः क्षत्रियर्षभ ।

— M_4 om. 12^{cd}. — ^{e}) $B_{1.3.5}$ Dn_2 $D_{4.11.12}$ T $G_{1.2}$ $M_{3.5}$ च (for वा). — After 12, all MSS. except K ($Ś_1$ *marg.*; $D_{1.3}$ transp. lines 1–2 and 3–4; $M_{1.2.4.5}$ om. line 2) ins.:

536* दानशीलो वदान्यश्च निभृतो ह्रीनिषेधकः ।
जनो जनपदे भाव्यो यत्र राजा युधिष्ठिरः ।
प्रियवादी सदा दान्तो भव्यः सत्यपरो जनः ।
हृष्टः पुष्टः शुचिर्दक्षो यत्र राजा युधिष्ठिरः ।

[(L. 1) S (except T_2) क्षमायुक्तः (for वदान्यश्च). B Dn $D_{2.5.6.10-12}$ **C**ap °षेवकः; $G_{1.3}$ M_4 °षेधनः; **C**a.c (cf. **C**v) °षेधकः (as above). — (L. 2) T G M_8 पुरे (for जनो). D_6 सर्वैः; **C**a.c.r.v भाव्यो (as in text). — (L. 3) D_{1-3} सत्य° (for प्रिय°). $B_{3.4}$ Dn_1 $D_{2.5-9}$ भाव्यः; **C**s भव्यः (as above). D_{10} भव्यः सत्यपरायणः (for posterior half). S प्रियवाक् (T_1 °वान्) सत्यवान् (T_2 G_2 °वाक्) शूरो (T_1 $G_{1.3}$ धीरो) धर्मशीलो जितेंद्रियः. — (L. 4) $Ś_1$ $D_{1.3.4.8.10}$ **C**a.v.rp (Dev.) तुष्टः; **C**r हृष्टः (as above). S तुष्टः (for पुष्टः). $Ś_1$ शुक्लो; B_4 D_8 **C**a.rp (Dev.) शुद्धो; $D_{1.3}$ शुक्तो; D_{10} शक्तो; **C**r दक्षः (as above). D_2 हृष्टपुष्टशुचिर्दक्षः. M_1 निवसेद्धर्मतत्परः (for the posterior half).]

13 ^{a}) $Ś_1$ $D_{1.4.6-8}$ चापीर्ष्युः; K_1 वापीर्षुः; B_3 चामर्षी; S वाक् (G_1 वै; G_3 वा) दुष्टो; **C**a.v चापीर्षुः (as in text) **C**c cites only ईर्षुः. — ^{b}) $Ś_1$ नाभिवादी; B Dn $D_{5.7.9.11.12}$ **C**a नाभिमानी; D_6 नातिमानी; T G_2 M नाल्पभाग्यो; $G_{1.3}$ नाल्पभोगी (for नातिवादी). — ^{d}) $B_{1.2.5}$ Dn $D_{11.12}$ T $G_{2.3}$ M_{1-4} स्वयं (for स्वं स्वं). G_1 यत्र राजा युधिष्ठिरः.

14 ^{a}) B_4 धर्मघोषाः. — ^{b}) T $G_{2.3}$ $M_{1.3.5}$ पुण्यशब्दाः; G_1 पुण्याः शब्दाः; $M_{2.4}$ शुभशब्दाः (for पूर्णाहुत्यः). D_4 M_1 च सर्वशः (for तथैव च). — ^{d}) M_3 यत्र राजा युधिष्ठिरः.

15 ^{b}) T_1 $G_{1.2}$ सम्यग्वर्षत्यसंशयः (T_1 °यं). — ^{c}) D_6 मही संगंधमासाद्य. — ^{d}) B_2 D_6 transp. निरी° and भवि°. $B_{1.3-5}$ Dn $D_{1.3.4.7.9-12}$ **C**r निरातंका; **C**a.c.rp निरीतिका; **C**rp निरीतीका (as in text). D_8 नैरंतर्या निरीतिका; S भविष्यति निरामया.

16 ^{a}) K धन°; $B_{1.2.5}$ Dn $D_{4.8.11.12}$ $G_{1.3}$ गुण°; $B_{3.4}$ $D_{5-7.9}$ फल°; $D_{1-3.10}$ स्वादु° (for रस°). $G_{1.3}$ सस्यानि (for धान्यानि). — ^{b}) B D $G_{1.3}$ रस° (for गुण°). K अपि (for च). — ^{c}) B_3 माल्यानि च सुगंधीनि.

17 G_3 transp. 17^{ab} and 17^{cd}. — ^{b}) Some MSS. निःप्रतीपं. Dn_1 निर्भयं वाति सर्वशः; S यत्र राजा युधिष्ठिरः. **C**a.c.n.s.v cite निष्प्रतीपं, **C**n also दर्शनं. — After 17^{ab}, M_5 reads 18, 538*, and 19. — T G $M_{1.4}$ ins. after 17^{ab}: M_5, after 19:

537* न रोगास्तत्र विद्यन्ते वधबन्धा न सन्ति च ।
न चोरा न हि दम्भाश्च न च बाधा भवन्ति च ।
नाशक्ता न च दुष्टाश्च यत्र राजा युधिष्ठिरः ।

[(L. 1) M_1 दृश्यंते (for विद्यन्ते), and नाधयो व्याधयो न च (for the posterior half).]

— After 537*, T G read 20, 18, 19. — G_1 $M_{1.2}$ om. 17^{cd}. — ^{c}) $Ś_1$ S (G_1 $M_{1.2}$ om.) भयं च नाविशेत्तत्र; B_4 भयं नात्राहितं तत्र; Dn $D_{11.12}$ भयं न त्वावि°; D_8 न पापीत्यावि°; D_{10} आपन्नाभ्यावि°. **C**c cites अत्याहितं, **C**rp (Cat.) नात्याहितं, **C**r अभ्याविशेत् (as in text).

18 B_4 (hapl.) om. 18–19; D_5 transp. 18 and

गुणवन्ति च पानानि भोज्यानि रसवन्ति च ।
तत्र देशे भविष्यन्ति यत्र राजा युधिष्ठिरः ॥ १९
रसाः स्पर्शाश्च गन्धाश्च शब्दाश्चापि गुणान्विताः ।
दृश्यानि च प्रसन्नानि यत्र राजा युधिष्ठिरः ॥ २०
स्वैः स्वैर्गुणैः सुसंयुक्तास्तस्मिन्वर्षे त्रयोदशे ।
देशे तस्मिन्भविष्यन्ति तात पाण्डवसंयुते ॥ २१
संप्रीतिमाञ्जनस्तत्र संतुष्टः शुचिरव्ययः ।
देवतातिथिपूजासु सर्वभूतानुरागवान् ॥ २२
इष्टदानो महोत्साहः शश्वद्धर्मपरायणः ।
अशुभद्विट् शुभप्रेप्सुर्नित्ययज्ञः शुभव्रतः ।
भविष्यति जनस्तत्र यत्र राजा युधिष्ठिरः ॥ २३
त्यक्तवाक्यानृतस्तात शुभकल्याणमङ्गलः ।
शुभार्थेप्सुः शुभमतिर्यत्र राजा युधिष्ठिरः ।
भविष्यति जनस्तत्र नित्यं चेष्टप्रियव्रतः ॥ २४ C. 4. 942 B. 4. 28. 30

19^{ab}. — a) S बहुक्षीरस्रवा (T1 G3 °स्रुवो; G1 M1. 2. 5 °प्रदा) गावः. — b) Ś1 (*sup. lin.* as in text) B (B4 om.) Dn D1. 3. 5. 6. 11. 12 दुर्बलाः; K दुर्ग्रहाः (for दुर्दुहाः). S सुपुष्टाश्च सु(G1. 3 °ष्टा घट)दोहनाः. — c) M मधु° (for दधि°). — d) K2 फलानि; G1. 3 मधूनि; Cc हितानि (as in text). — After 18, S ins.:

538* सलिलानि प्रसन्नानि सर्वे भावाश्च शोभनाः ।
[M1. 2 यत्र राजा युधिष्ठिरः (for the posterior half).]

— After 18, D4 reads 20–21.

19 B4 om. 19 (cf. v. l. 18); M1 om. 19; M2 om. 19–20. D5 transp. 18 and 19^{ab}. — ab) Ś1 M4 transp. पानानि and भोज्यानि. K2 Dn D6. 10–12 G1. 3 पेयानि; B (B4 om.) D5 भोज्यानि; Cv पानानि (as in text). B (B4 om.) D5 पेयानि; D7. 9 भक्ष्याणि (for भोज्यानि). D1–3 च भवंति; S (M1. 2 om.) विविधानि (for रस°). — c) D9 काले; S (M1. 2 om.) राजन् (for देशे).

20 D9 M3 om. 20. M2 also om. 20 (cf. v. l. 19). D4 reads 20–21, after 18. T G read 20 after 537* (cf. v. l. 17). — ab) Ś1 T G2 transp. गन्धाः and शब्दाः. G1. 3 एव (for अपि). D8 रूपशब्दा (for शब्दाश्चापि). D1–3. 7 M1 गुणाधिकाः. — c) B1. 3. 5 D1–3. 6. 8. 10 दिशश्चैव; B4 D7 दृश्याश्चैव; D4 दृश्यंतेत्र; M1 दृश्याधिक (for दृश्यानि च). Cc. r cite दृश्यानि. B3. 4 D1–3. 6–8. 10 प्रसन्नाश्च; Cr प्रसन्नानि (as in text). — After 20, B4 Dn D1–3. 6. 8. 10–12 ins.:

539* धर्माश्च तत्र दृश्यन्ते सेविताश्च द्विजातिभिः ।
[Dn1 D11m सर्वैस्तु (for दृश्यन्ते).]

21 D4 reads 20–21 after 18. — a) Ś1 B2 D5 समायुक्ताः; B3. 5 Dn D1–3. 6–8. 11. 12 S च (D7 तु) संयुक्ताः; D4. 10 च संपन्नाः; D9 संप्रयुक्ताः (for सुसं°). — b) B1. 3. 5 Dn D1. 2. 4. 8. 10 अस्मिन्; B2. 4 D5. 6 ह्यस्मिन्; D3 यस्मिन्; T G2 तत्र. — c) D6 तत्र (for देशे). D1–3 चास्मिन्; D4. 8 S तत्र; D6 देशे. — d) B4 जनाः; D8 वर्षाः; M1 यत्र (for तात). K1 पांडवसंगते; S °संश्रिते (G1 °विश्रुते).

22 a) D4 नाप्रीतिमान् (for संप्री°). B1. 3. 5 जनश्चैव; Dn2 D11. 12 जनपदः (for जनस्तत्र). — b) D2 संहृष्टः; Cv संतुष्टः (as in text). B3 D6 T1 M3–5 अव्ययः; D5 m. 7. 9 उज्ज्वलः; Cv अव्ययः (as in text). D1 हृष्टपुष्टोतिमानदः; D3 हृष्टपुष्टोभवत्तदा. — c) Dn2 D11. 12 °पूजा च. — d) N (except B4 D10) सर्वभावानु°.

23 a) K इष्टदाने. D5 S इष्टदाना (D5 G1. 3 M3 °न-) महोत्साहाः (D5 °हः). — b) K2 B (except B4) Dn D7. 9. 11. 12 स्वस्वधर्म°; D1–3 सत्यधर्म°; S नित्यं (T1 G2 M2. 3. 5 °त्य-) धर्मपरायणाः. — After 23^{ab}, D4 S read 24^{ab}. — c) Ś1 K B (except B4) Dn2 D11. 12 अशुभाद्धि शुभ(K °भे)प्रेप्सुः; S अशुभद्विषः (T1 शुभद्विषे; T2 G2 अहिंसकाः; G1 शुभवृत्ताः; G3 शुभप्रीताः) शुभेच्छाश्च. Cn cites अशुभात्. — d) Dn D11. 12 इष्टयज्ञः; S नित्य(T1 G2. 3 °त्यं)तुष्टाः. D4. 5 m. 7. 9 श्रियावृतः; T G2 M1. 3 शुभान्विताः; G1. 3 M2. 4. 5 श्रियान्विताः. — e) S भविष्यंति जनास्तत्र. — After 23, S (except M1. 3) ins.:

540* नित्योत्सवप्रमुदितो नित्यहृष्टः श्रिया वृतः ।
भविष्यति निवासोऽयं यत्र राजा युधिष्ठिरः ।

24 D4 S read 24^{ab} after 23^{ab}. — a) B2 D1. 3. 4 सत्यवाक्या(D4 °क्यो)नृतस्; D10 शुभवाक्यादृतस्; T G M3 व्यक्तवाक्यास्ततस्; M1. 2 °क्यास्तथा (M2 °स्ततस्); M4 व्यक्तवाक्या जनास्; M5 त्यक्तवक्रानृतस्. Cv analyses त्यक्त° (as in text). D4 त्रस्तः; D7. 9 M4 तत्र (for तात). — b) D8 °मंगलं; S °मंगलाः. Cv cites शुभ° (as in text). Cf. Cc. r. — Ś1 om. 24^{cd}; S om. 24^{cdef}. — B2 D6 ins. after 24^{cd}: B4, after 24:

541* सर्वभूतदयायुक्तः सदा निर्मलमानसः ।
[B4 °भूतहिते युक्तः.]

Thereafter B4 repeats 23^{ef}. D4 (which om. 24^{e}–25^{b}) ins. after 24^{cd}:

C. 4. 942 B. 4. 28. 30 K. 4. 31. 50

धर्मात्मा स तदादृश्यः सोऽपि तात द्विजातिभिः ।
किं पुनः प्राकृतैः पार्थः शक्यो विज्ञातुमन्ततः ॥ २५
यस्मिन्सत्यं धृतिर्दानं परा शान्तिर्ध्रुवा क्षमा ।
ह्रीः श्रीः कीर्तिः परं तेज आनृशंस्यमथार्जवम् ॥ २६
तस्मात्तत्र निवासं तु छन्नं सत्रेण धीमतः ।
गतिं वा परमां तस्य नोत्सहे वक्तुमन्यथा ॥ २७
एवमेतत्तु संचिन्त्य यत्कृतं मन्यसे हितम् ।
तत्क्षिप्रं कुरु कौरव्य यद्येवं श्रद्दधासि मे ॥ २८

इति श्रीमहाभारते विराटपर्वणि सप्तविंशोऽध्यायः ॥ २७ ॥

२८

वैशंपायन उवाच ।
ततः शारद्वतो वाक्यमित्युवाच कृपस्तदा ।
युक्तं प्राप्तं च वृद्धेन पाण्डवान्प्रति भाषितम् ॥ १
धर्मार्थसहितं श्लक्ष्णं तत्त्वतश्च सहेतुमत् ।
तत्रानुरूपं भीष्मेण ममाप्यत्र गिरं शृणु ॥ २
तेषां चैव गतिस्तीर्थैर्वासश्चैषां प्रचिन्त्यताम् ।

542* अनिर्दिश्यः स धर्मात्मा द्विजैरपि हि भारत ।

25 D4 om. 25^{ab} (cf. v. l. 24). — ^{a}) Ś1 स तथा; B (except B4) Dn2 D5–7. 9. 11. 12 सततं; Dn1 शक्यते (for स तदा). Dn1 ज्ञातुं (for दृश्यः). D1–3. 8 धर्मात्मावस्थितो दृश्यः (D1 देशाः); S धर्मात्मा स तु (T2 G2 सुधर्मात्मा सु-) दुर्ज्ञेयः. ❀ Cr: धर्मात्मासततमित्यत्र नञर्थोऽकारस्तेन अदृश्य इत्यर्थः ।❀ — ^{b}) Dn1 न (for सो). D1. 3 प्रेक्ष्यः; D2 अप्येष (for सोऽपि). D5 m. 7. 9 सोपि तादृग्विधैर्नृभिः; S सर्वज्ञैश्च (T2 विज्ञेयश्च; G2 सुज्ञेयश्च) द्विजा°. — ^{cd}) K transp. पार्थः and शक्यः. Dn D11. 12 तात; G1 पापैः (for पार्थः). Ś1 K हि ज्ञातुम्; B2 वेदितुम् (for विज्ञातुम्). Dn D11. 12 पार्थो विज्ञायते क्वचित्; S शक्यो ज्ञातुं वने वसन्.

26 ^{a}) B1 T G1. 2 M2. 4. 5 तस्मिन्; G3 तस्मात्. K दांतं; B2 D5. 6. 10 दाक्ष्यं (for दानं). — ^{b}) Ś1 K B4 D1–3. 5–10 शक्तिः; G3 श्रुतिः (for शान्तिः). Ś1 दमः; B4 दया (for ध्रुवा). — After 26^{ab}, Ś1 ins. in the text: शक्तौ सत्यामपि परापराधसहिष्णुता क्षमा ।, which is an *explanation* of the word क्षमा. — ^{c}) B2 D5 श्रीः कीर्तिर्ह्रीः परं तेजः. — ^{d}) Ś1 तथा; T2 G2 परा (for अथ).

27 ^{a}) S तस्मान्निवासः (M °सं) पार्थानां. — ^{b}) K1 मैत्रेण; K2 B (except B3) Dn D1–4. 9 m. 11. 12 यत्नेन; D5. 9 मंत्रेण; Cv सत्रेण (as in text). Cs cites सत्रं. Ś1 धीमता. S चिंत्यतां यद्ब्रवीमि वः. — ^{c}) S (except M2) गतिर्. Ś1 B Dn D1–4. 6–12 च; D5 तु (for वा). S (except M2) परमा. B (except B4) Dn D1–3. 11. 12 T G2 M1–4 तत्र; G1. 3 वक्तुं; M5 तेषां (for तस्य).

28 ^{a}) B1 D4 S एव; Dn2 D8. 11. 12 एवं; D10 एतं (for एतत्). — ^{b}) B1. 3–5 Dn2 D10. 11 T1 G1. 3 M (except M3) कृत्यं; B2 कृते; D4 द्रुतं; T2 G2 क्षिप्रं (for कृतं). S साधु मन्यसे (for मन्यसे हितं). — ^{d}) S एतत् (for एवं). — After 28, S (except T2) ins.:

543* कुलस्य हि क्षमं तात यदहं तद्ब्रवीमि ते ।
[M प्रब्र° (for तद्ब्र°).]

Colophon om. in D1–3; D7 reads it in marg. — *Adhy. name:* K1 चांत्याचार (sic); K2 प्रत्याचारः; B1. 3 Dn D5. 7 m. 9. 11. 12 T2 भीष्मवाक्यं; B2. 4 D4. 6. 8. 10 चार(D8 om. it)प्रत्याचारे भीष्मवाक्यं; M1. 3 पांडवपरिज्ञाने (M3 om. it) द्रोणभीष्मवाक्यं. — *Adhy. no.* (figures, words or both): Ś1 B4 D6. 10 27; D5. 11 28; S 30 (M2–5 29). — *S'loka no.:* G3 47.

28

1 ^{a}) T अथ (for ततः). D4 वाङ्मी; D5 वाचं (for वाक्यं). — ^{b}) D1–3 transp. कृपः and तदा. D4 प्रत्युवाच ततस्तदा. — ^{c}) Ś1 K Dn1 D1 प्रोक्तं; Ca स्वाप्तं; Cc. n. r. s प्राप्तं (as in text). — ^{d}) Ś1 भाषितुं.

2 ^{a}) Dn1 धर्मेण सहितं. B4 सूक्ष्मं; G3 वक्ष्ये; Ca. v श्लक्ष्णं (as in text). — ^{b}) D6 धर्मतत्वं; D9 तत्ववच्च; T1 G1. 3 M सर्वं तथ्यं; T2 G2 सर्वं सत्यं (for तत्त्वतश्च). Ś1 B D (except D1–3. 8) T G2 सहेतुकं; M1 तु हेतुमत्. K2 तच्च तत्वं च हेतुमत्. — ^{c}) B4 भद्रमुक्तं च; D1–3 तत्वानुरूपं; D4 आत्मानु°; G1 तवानु°; G3 तथानु°; M1. 5 अत्रानु° (for तत्रा°). Cr cites अनुरूपं (as in text). T G M1 भीष्मस्य. — ^{d}) T G वचनं; M च वचः (for अत्र गिरं).

3 ^{a}) Dn2 D2. 9. 11. 12 गतिं; Ca गतिः (as in text).

नीतिर्विधीयतां चापि सांप्रतं या हिता भवेत् ॥ ३
नावज्ञेयो रिपुस्तात प्राकृतोऽपि बुभूषता ।
किं पुनः पाण्डवास्तात सर्वास्त्रकुशला रणे ॥ ४
तस्मात्सत्रं प्रविष्टेषु पाण्डवेषु महात्मसु ।
गूढभावेषु छन्नेषु काले चोदयमागते ॥ ५
स्वराष्ट्रपरराष्ट्रेषु ज्ञातव्यं बलमात्मनः ।
उदये पाण्डवानां च प्राप्ते काले न संशयः ॥ ६
निवृत्तसमयाः पार्था महात्मानो महाबलाः ।
महोत्साहा भविष्यन्ति पाण्डवा ह्यतितेजसः ॥ ७
तस्माद्बलं च कोशं च नीतिश्चापि विधीयताम् ।
यथा कालोदये प्राप्ते सम्यक्तैः संदधामहे ॥ ८
तात मन्यामि तत्सर्वं बुध्यस्व बलमात्मनः ।
नियतं सर्वमित्रेषु बलवत्स्वबलेषु च ॥ ९
उच्चावचं बलं ज्ञात्वा मध्यस्थं चापि भारत ।
प्रहृष्टमप्रहृष्टं च संदधाम तथा परैः ॥ १०
साम्ना भेदेन दानेन दण्डेन बलिकर्मणा ।
न्यायेनानम्य च परान्बलाच्चानम्य दुर्बलान् ॥ ११
सान्त्वयित्वा च मित्राणि बलं चाभाष्यतां सुखम् । C. 4. 968 B. 4. 29. 12 K. 4. 32. 12

K D4.5.7.8.10 Cr तथ्या; B3.4 D6 Ca.rp (Dev.) तर्क्या; D1.3 तत्वात्; D2 सम्यक्; D9.11.12 सूक्ष्मां; T G2 तत्र; G1.3 M तात; Cs तीर्थैः (as in text). — b) Dn2 D6.11.12 वासं; Ca वासः (as in text). K2 D1.3.8 वि- (for प्र-). T G निवासश्चानुचिं°; M वासश्चैवानुचिं°. — c) D1.3 G1.3 M (except M2) अत्र; T G2 तत्र (for चापि). — d) D4 °तं या विधीयते.

4 b) M2.3 बलीयसा (for बुभूषता). — c) K2 D4 तत्र; S शूराः (for तात). — d) D1.3.8.10 सर्वा(D10 धर्मा)र्थकुशला रणे (D3 इमे); S विद्वांसो बलिनस्तथा.

5 a) Ś1 क्षत्रं; K मंत्रं; D9 छद्म (gloss); T2 सम्यक्; G1.3 तत्र; Cs.v सत्रं (as in text). Ś1 विशिष्टेषु; Cv प्रवि° (as in text). D2 तस्मात्सत्यप्रतिष्ठेषु. — M4 (hapl.) om. 5^{b}–6^{a}.

6 M4 om. 6^{a} (cf. v. l. 5). — a) B2 D (except D1.3.4.9.10) स्वराष्ट्रे (D10 °ष्ट्रा-) परराष्ट्रेषु (Dn D5.11.12 °ष्ट्रे च; D6 °ष्ट्रे वा). — b) Ś1 फलम्; Cc बलम् (as in text). — c) B3 भावाय; B5 Dn1 D1.3.9.10 S उदयः; D4 उदयं. B2 D5 पांडुपुत्राणां; D4 S पांडवेयानां. — d) B2.4 Dn2 D2.5 प्राप्तकाले; D9 S प्राप्तकालो. — After 6, S ins.:

544* निवासं पाण्डुपुत्राणां दर्शने मृगयामहे ।

7 a) M5 ते हि (for पार्था). — b) D1–3 M5 सत्यव्रतपरायणाः; D6 (m as in text) °नो महारथाः. — d) Ś1 K B1–3.5 Dn1 D2.5 G3 M5 ह्यमितौजसः; Dn2 D11 ह्यग्नितेजसः; D1.3.4 अमितौ°; D7 चातिते°, D9 चाग्निते°; D12 अग्निते° (for ह्यतिते°).

8 a) Ś1 D (except Dn2 D6.11.12) S (except G M4) कोशश्; a few MSS. कोषं. — b) S एव (for अपि). — c) Ś1 अथ (for यथा). — d) B4.5 D10 संदधीमहे; Dn1 D5 संदधीमहि; D11m Cn.s as in text. Dn2 D11.12 Cnp सम्यक्तेषां विधीयते; S सम्यक् संधामहे (T1 G1.3 संदध्महे) परैः.

9 D3 om. 9. — a) B2 D5.6 इति (for तात). Ś1 K पश्यामि; B4 Dn1 बुद्ध्वापि; D5 मत्वापि; D8 वक्ष्यामि (for मन्यामि). D1.2 तत्राहं (for तत्सर्वं). B1.3 D7m.10 मन्ये तत्र त्वहं तात; B5 Dn2 D11.12 य(B5 त)देतन्मन्यसे सर्वं (B5 यत्तु) (D11m तात बुध्यापि तत्सर्वं); D4.7.9 तात मन्यामहे सर्वं (D4 तत्र); D5m न ते वक्ष्यामि तत्राहं; S यत्र (M1.5 तत्र) यन्मन्यसे श्रेयः. — b) Dn1 हितं (for बलं). — G1 om. 9^{c}–10^{b}. — c) D1.4 नियतः; T1 G2.3 निश्चयं; Ca.c नियतं (as in text). G3 शत्रु°; M1.5 सत्त्व° (for सर्व°). — d) K बलेषु बलवत्सु च; M1 °वत्स्वितरेषु च.

10 G1 om. 10^{ab} (cf. v. l. 9). — a) T1 G3 M2–4 सारं (M2.3 सार-) फल्गु बलं ज्ञा°; T2 G2 स त्वं परबलं ज्ञा°; M1.5 सारफल्गुफलं ज्ञा°. Crp (Cat.) cites दृढं कृत्वा (cf. Cc); Cr बलं ज्ञात्वा (as in text). — b) T1 मध्यस्थानां च; T2 G2 मध्यस्थांश्चापि. — After 10^{ab}, S (except G1 M3) *repeat* 6^{ab} (v. l. in T G2 स्वराष्ट्रे पर°). — c) D6 Ca प्रकृष्टं (for प्रहृष्टं). B4 D6 Ca अप्र(B4 °प)कृष्टं; D4 G1.3 वाप्रहृष्टं (for अप्रहृष्टं). D4.8.9 S वा (for च). — d) Ś1 K2 D1–3.8 संदधामस्; Dn2 D11.12 Cnp संधनीयं; D4.6 संदधानस्; D10 °धीमस्; Cn as in text. Dn2 D11.12 अथापरैः; D5 (m as in text) यथा परैः. T G तथा (T2 तदा) संदध्महे (T1 °ध्म नः) परैः; M तथा संधामहे परैः (M5 मध्योदासीनमेव च).

11 ab) D1–4.7–9 S transp. भेदेन and दानेन. Dn2 D5.11.12 transp. दानेन and दण्डेन. D10 साम्ना दानेन दंडेन भेदेन बलि°. — c) D4 नयेन; Ca.c न्यायेन (as in text). B1.2.5 Dn D1.3.10–12 आक्रम्य; D2 अन्येन (for आनम्य). D1–3 च परं; S बलिनो. Cc cites परान्. — d) D3 T2 om. च. D8 आक्रम्य (for आनम्य). S

C. 4. 968 B. 4. 29. 12 K. 4. 32. 13

सकोशबलसंवृद्धः सम्यक्सिद्धिमवाप्स्यसि ॥ १२
योत्स्यसे चापि बलिभिररिभिः प्रत्युपस्थितैः ।
अन्यैस्त्वं पाण्डवैर्वापि हीनस्वबलवाहनैः ॥ १३
एवं सर्वं विनिश्चित्य व्यवसायं स्वधर्मतः ।
यथाकालं मनुष्येन्द्र चिरं सुखमवाप्स्यसि ॥ १४

इति श्रीमहाभारते विराटपर्वणि अष्टाविंशोऽध्यायः ॥ २८ ॥

२९

वैशंपायन उवाच ।
अथ राजा त्रिगर्तानां सुशर्मा रथयूथपः ।
प्राप्तकालमिदं वाक्यमुवाच त्वरितो भृशम् ॥ १
असकृन्निकृतः पूर्वं मत्स्यैः साल्वेयकैः सह ।
सूतेन चैव मत्स्यस्य कीचकेन पुनः पुनः ॥ २ ॥
बाधितो बन्धुभिः सार्धं बलाद्बलवता विभो ।
स कर्णमभ्युदीक्ष्याथ दुर्योधनमभाषत ॥ ३
असकृन्मत्स्यराज्ञा मे राष्ट्रं बाधितमोजसा ।

दुर्हृदः (for दुर्बलान्).

12 ^{b}) B_3 om. च. $D_{1.3}$ बलं चाभाष्य मुख्यतः; $D_{4.5}$ बलं चाभाष्य वै सुखं ($D_{4.5}$m शुभं); S स्वं चाभाष्य बलं सुखं. **Ca.s** cite बलं and आभाष्यतां, **Ca** also सुखं. — ^{c}) B_1 Dn_2 $D_{7.11.12}$ सुकोश°; D_{1-3} स्वकोश(D_2 सकोशो)बलसंपन्नः; D_6 सकोषबलबद्धः स्यात्; S स्वकोश°. — ^{d}) S सर्वां (for सम्यक्). K_1 Dn_1 $D_{7.9}$ संधिम्; T_1 G_2 वृद्धिम्; **Cn** सिद्धिम् (as in text). — After 12, G_1 M_4 (which om. st. 13–14) ins. a passage given in App. I (No. 27); cf. v. l. 14.

13 D_4 G_1 M_4 om. 13–14. — ^{b}) D_8 अरातिभिरुपस्थितैः. — ^{c}) $D_{7.9}$ च; S (G_1 M_4 om.) वा (for त्वं). B_4 पार्थिवैर् (for पाण्डवैर्). Dn_2 $D_{3.7.9.11.12}$ **Cn** च (for वा). — ^{d}) Ś$_1$ K हीन(K_2 °नः)स्वबलपौरुषैः; B_4 Dn $D_{7.9-12}$ हीनैश्च (B_4 D_{10} हीनाः स्व-; $D_{7.9}$ हीनाश्च) बल°; D_3 S (except T_2 G_2; G_1 M_4 om.) हीनः स्व°; D_8 °बलमात्मभिः.

14 D_4 G_1 M_4 om. 14 (cf. v. l. 13). — ^{a}) Ś$_1$ K विनिक्षिप्य. — ^{b}) D_{5}m.$_{7.9}$ व्यवहारं (for व्यवसायं). D_9m स्वकर्मणः (orig. स्वधर्मतः as in text). S (G_1 M_4 om.) व्यवहर्तासि न्यायतः (G_3 नान्यतः). — ^{c}) D_{10} यथाकामं. — A passge given in App. I (No. 27) is ins. in S after 14 (in G_1 M_4, which om. 13–14, after 12).

Colophon om. in S; D_7 reads it in marg. — *Adhy. name:* K भीष्मद्रोणकृपानुशासनं; B_{1-3} Dn $D_{4.5.7}$m.$_{8.9.11.12}$ कृपवाक्यं; $B_{4.5}$ $D_{6.10}$ चारप्रत्याचारे कृपवाक्यं; $D_{1.2}$ चारप्रत्याचारः; D_3 चारप्रचारः. — *Adhy. no.* (figures, words or both): Ś$_1$ K_1 B_4 $D_{6.10}$ 28; D_5 29. — *S'loka no.:* D_1 47.

29

1 ^{a}) D_4 S ततो; **Ca** अथ (as in text). — After 1^{ab}, S ins.:

545* पूर्वमाभाष्य कर्णेन तथा दुःशासनेन च ।

— ^{d}) B_2 त्वरितं. Dn_1 D_{11}m.$_{12}$ S बली (for भृशम्).

2 Before 2, S (except M_5) ins. सुशर्मा. — ^{a}) Ś$_1$ Dn $D_{6.11}$ (before corr.) **Cs** निकृताः; $D_{4.8}$ निष्कृतः; $D_{7.9}$ निर्जितः. $G_{1.3}$ तेन (for पूर्वं). — ^{b}) K_2 अहं (for सह). Ś$_1$ B D मत्स्य(D_{10} °त्स्यैः)शाल्वे(B_4 $D_{1.2.8}$ °ल्व)यकैः प्रभो (Ś$_1$ B_4 सह; $D_{1-3.10}$ परैः); S (M_4 *sup. lin.*) मा(T_2 M_2 म)त्स्यसाल्वेयकेकयैः (M_4 orig. मात्स्यकेकयबाल्हिकैः). — ^{c}) Dn_1 transp. च and एव. M_1 अपि (for एव). D_8 मत्स्यानां; D_{10} मत्स्येन; S (except G_3 M_3) मात्स्यस्य. — ^{d}) S पुरा त्वहं (for पुनः पुनः).

3 ^{a}) $M_{1.3}$ पातितो; M_5 घातितो (for बाधितो). M_5 भ्रातृभिः (for बन्धुभिः). — ^{b}) G_3 **Cn** बलवतां. Ś$_1$ विधौ; G_3 प्रभो; **Cn** विभौ. — G_1 om. 3^{cd}. — ^{c}) S (except T_2; G_1 om.) अभि(G_2 °पि)वीक्ष्य (for अभ्यु°). — ^{d}) $M_{1.2}$ सुयो° (for दुर्यो°).

4 ^{a}) Ś$_1$ मत्स्यराज्ञस्ते; K °राज्ञा ते; B_4 Dn_2 $D_{6.11.12}$ °राजेन. S राष्ट्रं ममासकृद्राजन्. — ^{b}) Ś$_1$ बाधितुम्. S राज्ञा मा($G_{1.3}$ M_5 म)त्स्येन बाधितं. — ^{c}) $B_{1.2.5}$ Dn_2 $D_{7.9.11.12}$ S तस्य (for चास्य). — ^{d}) Ś$_1$ K °वान्योभवत्पुरा; D_1 S बलमत्तोभव(D_1 °त्तोभ्यभू)त्पुरा; D_2 बले

प्रणेता कीचकश्चास्य बलवानभवत्पुरा ॥ ४
क्रूरोऽमर्षी स दुष्टात्मा भुवि प्रख्यातविक्रमः ।
निहतस्तत्र गन्धर्वैः पापकर्मा नृशंसवान् ॥ ५
तस्मिंश्च निहते राजन्हीनदर्पो निराश्रयः ।
भविष्यति निरुत्साहो विराट इति मे मतिः ॥ ६
तत्र यात्रा मम मता यदि ते रोचतेऽनघ ।
